Acc no 8229
H 365
924

THE

Sabdikadarsa Series

SRI CHAMARAJENDRA SANSKRIT C
वाणीं सृजत गैर्वाणीं
LIBRARY.
FORT, BANGALORE.

॥ नागेशाशयनिर्णयः ॥

Nagesasaya Nirnaya

No. 3. **Part I.**

BY

MEDHASRI PANDITA KAVISEKHAR,

Pandit NARAYANA SASTRIGAL

OF RADHAMANGALAM,

Senior Professor of Vyakarana, Sanskrit College, Trivadi.

SRIRANGAM:
SRI VANI VILAS PRESS
1913.

Copyright Registered.] [Price **As. 6.** Postage extra.

NOTICE.

Nagesasaya Nirnaya.

It is with great pleasure that we announce the publication of a new work on Vyakarana called **NAGESASAYA NIRNAYA** by Medhasri Pandit Kavisekhara Pandit R. Narayana Sastrigal, Senior Professor of Vyakarana, Sanskrit College, Trivadi. It goes without saying that Vyakarana is the most important and the most popular of all the Vedangas and among the various works on Vyakarana the Paribhashendusekhara of Nagoji Bhatta takes a foremost place. There are several commentaries on the Paribhashendusekhara but all of them are more or less adverse criticisms of the text. Hence a learned and at the same time an appreciative commentary on this great work was, up to now, an essential desideratum. To supply this real want is the object of this venture. That Pandit R. Narayana Sastrigal is eminently fitted for the task he has undertaken is amply testified to by Mahamahopadhyaya Pandit Subbarayachariar and others who, as is well known, are thoroughly competent to pronounce an opinion on the subject. This commentary is intended not only to expound faithfully the beliefs of Nagesa Bhatta as explained in his Paribhashendusekhara but also to critically examine the various interpretations given by different other commentators. A perusal of the specimen pages will surely convince all readers of the usefulness of this commentary. To keep it within the reach of all it is resolved to issue it in monthly parts of not less than 32 pages Royal Octavo for **ANNAS 6** only per part. (As. 8 per V. P. P.). As only a limited number of copies are printed, intending subscribers should apply at once to the undesigned.

THE MANAGER,
Nagesasaya Nirnaya,
Sri Vani Vilas Press,
Srirangam, Madras Presidency, India.

SGDF

E.S.V.B.P.
SOCITY 1916 7 28
MYSORE

Acc No 8229
4365

[illegible]

SRI HARI RAGHAVENDRA SANSKRIT LIBRARY FORT, BANGALORE.

तिबन्धकाभावेन परिभाषोपस्थितिसिद्धौ कार्यकालपक्षे संज्ञाशास्त्राणां पदैकवाक्यता संभवति, अतो विध्येकवाक्यतया अर्थबोधकत्वं संज्ञाशास्त्रेष्वपि संभवतीति नेदमुक्तं समञ्जसम्, यतो वृद्ध्यादिपदानामुपस्थापकतया चरितार्थ्ये आकर्षणे सामर्थ्यासंभवेन कार्येणाकर्षणासंभवात् ‘इको गुणवृद्धी’ इत्यादीनां त्रैपादिकविध्युपकारकत्वं न युज्यते वक्तुम् । अथ अधिकारद्वयसाम्याद्विध्येकवाक्यतयार्थबोधकत्वमित्यङ्गीकृतम् । तत्र पदैकवाक्यतयार्थबोधकत्वं वा, आहोस्वित् वाक्यैकवाक्यतया नाद्यः; ‘पूर्वत्रासिद्धम्’ इत्यादेर्वाक्यैकवाक्यतयैवार्थबोधकत्वाद्यतो भवत्युक्तकल्पनाया अनवकाशः । नाप्यन्त्यः; संज्ञाशास्त्राणां कार्यकालपक्षे वाक्यैकवाक्यतयार्थबोधकत्वं संभवतीति संज्ञाशास्त्रेषु विध्येकवाक्यतयार्थबोधकत्वं संभवति, अतः संज्ञाशास्त्रविषयतया संकोचकल्पनं यतो भवत्यप्रामाणिकमिति चेदुच्यते; चकारेणानुकृष्यमाणानां पदैकवाक्यतयार्थबोधकत्वमिति तावन्निर्विवादम्, एवं स्वरितत्वेनाधिक्रियमाणेष्वपि पदैकवाक्यता संभवतीति तदुभयसाधारण्येन पदैकवाक्यतयार्थबोधकत्वस्याश्रयणीयतया परिभाषाशास्त्रेष्वेव तत्संभवतीति, संज्ञाशास्त्रेषु तु पदैकवाक्यताया असंभवेन तत्संकोचकल्पनं प्रामाणिकमेव । अत एव ‘न लुमताङ्गस्य’ इति सूत्रे ‘पदैकवाक्यतया अन्वयस्तु संज्ञाशास्त्राणां दुर्लभ एव’ इत्युक्तं सुबन्तशेखरे । न हि ‘कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति’ इति भाष्येण एकदेशस्थस्यापि दीपस्य प्रभाद्वारा यथा सर्वगृहप्रकाशकत्वं एकदेशस्थस्यापि लिङ्गेन गृहीतस्वार्थस्मृतिद्वारा तथा सर्वशास्त्रोपकारकत्वमित्येव बोध्यते, अतश्च विध्येकवाक्यतयैव विध्युपकारकत्वमित्यत्र विनिगमनाभावः । एवं च ‘कश्चिदेकदेशस्थः—’ इत्यादिभाष्यं संज्ञाशास्त्रविषयकमपीति शक्यते वक्तुं स्वार्थस्मृतिद्वारा सर्वशास्त्रोपकारकत्वमिति काममभ्युपगम्यताम्; परं तु दीपजन्यप्रभाजन्यप्रसरणजन्यप्रकाशवत् गुणशास्त्रजन्यवाक्यार्थबोधजन्यशक्तिग्रहजन्यसंस्कारजन्यस्मरणजन्योपकारकत्वस्य संज्ञाविषये वक्तव्यत्वेन दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं दुष्परिहरम् । अतश्च प्रदीपदृष्टान्तं परं प्रदर्शयन् भगवान्भाष्यकारो व्याकुप्येदेव । गुणशास्त्रवाक्यार्थबोधजन्यविधेयदलोपस्थितिजन्योपकारकत्वमादाय साम्ये संभवति वैषम्यकल्पनमन्याय्यं च स्यात् । एतेन “एकवाक्यतयैव

ಪುಸ್ತಕದ ಸಂಖ್ಯೆ...E 924......

विध्युपकारकत्वानियमो न, किं तु एकदेशस्थस्यापि दीपस्य प्रभाद्वारा सर्वगृहप्रकाशकत्ववदेकदेशस्थस्यापि लिङ्गेन गृहीतस्वार्थस्मृतिद्वारा सर्वशास्त्रोपकारकत्वमेवेति यत्सर्वमङ्गलाकारोक्तं तद्विण्डखण्डोद्भावितभूधरचालनसङ्कल्पसमानफलम्। यतो लाघवानुगृहीतया एकवाक्यतया विध्युपकारकयोरनुकृष्यमाणाधिक्रियमाणयोः प्रथमप्रतिपाद्यतायां गौरवग्रस्तवाक्यभेदव्याहतकाश्चित्पदोपादेयप्रथमप्रतिपादनपरभाष्यासङ्गतिः । अथेदं 'षष्ठीस्थाने—' इति सूत्रस्थं 'एकदेशस्थः—' इत्यादिभाष्यं न तावद्यथोद्देशपक्षाभिप्रायकम् , यतः 'प्रतियोगं तस्यानिर्देशार्थः' इति पक्षे योगे योगे उपतिष्ठते इतिवदेकदेशस्थ इति पक्षेऽपि योगो योग उपतिष्ठत इति नोक्तमिति यत्प्रत्यवतिष्ठते सर्वमङ्गलाकारः; तत्सर्वमज्ञानविजृम्भितम् , स्वमात्रसंतोष्यम् , नव्यमते यथोद्देशे वाक्यार्थैकवाक्यतया पदैकवाक्यतया वा गुणशास्त्रजन्यवाक्यार्थबोधानन्तरं गुणाकाङ्क्षया तेन विधिवाक्यार्थज्ञानेनौपश्लेषिकाधिकरणबोधकसप्तम्यन्तत्वादिरूपलिङ्गज्ञानात्परिभाषाशास्त्रविधेयपदोपस्थित्या विधिवाक्यार्थपरिष्कार इत्यङ्गीकारेण 'योगो योग उपतिष्ठते' इति ब्रूयादित्युक्तिर्व्याहतैवेति दूरीकृतम् । एवमुक्तभाष्यस्य कार्यकालपक्षाभिप्रायकत्वे अधिकारद्वयवत्परिभाषाणामपि विधिदेशसंबन्धेन 'कश्चिदेकदेशस्थः–' इति ग्रन्थेन परिभाषाशास्त्रस्यैकदेशस्थत्वप्रतिपादनवत्स्वरितत्वप्रतिज्ञया अधिक्रियमाणेषु च एकदेशस्थत्वस्यापलपितुमशक्यत्वात् , परिभाषाशास्त्रविषये दीपदृष्टान्तप्रदर्शनमितरयोः काष्ठदृष्टान्तेनानेकदेशसम्बन्धप्रतिपादनमिति वैषम्यस्याकिंचित्करत्वाद्भाष्यमसंगतं स्यादित्युक्तभाष्यं न त्वदुक्तौ साधकम् । प्रत्युत बाधकमेव' इति यत्सर्वमङ्गलाकारेण विजृम्भितम्; तत्कार्यकालपक्षे वाक्यार्थैकवाक्यतापन्नानां पदैकवाक्यतापन्नानां वा परिभाषाणां त्रैपादिकविधिमात्रोपकारकत्वमिति सिद्धान्तितत्वात् तत्र पक्षे परिभाषानियमविधिबललभ्यार्थिकनिषेधपरविशेषणदलोपस्थितिः, परिभाषाघटकतद्विधेयइकइत्यादिपदोपस्थितिर्वा, इत्यङ्गीकारेण परिभाषाज्ञानदेशादनपकर्षणेनऽनैकदेशस्थविधिसम्बन्धमन्तरेणैव स्वजन्यवाक्यार्थबोधजन्यविशेषणदलोपस्थितिद्वारा, स्वजन्यवाक्यार्थबोधजन्यविधेयपदोपस्थितिद्वारा वा त्रैपादिकविध्युपकारकत्वं स्वरितत्वेनाधिक्रियमाणस्य चकारेणानुकृष्यमाणस्य च स्वदेशात्काष्ठवदपकर्षणेनानेकदेशस्थविधिसम्बन्धेनैव विध्युपकारकत्वम्, इति वै-

SGDF
Sri Gangeshwari Digital Foundation

लक्षण्यं बोधयितुं दृष्टान्तद्वयोपन्यासो युक्त एव 'अनेकदेशसम्बन्धेनैकदेशस्थत्वं दुर्निरूपम्' इति 'षष्ठीस्थान—' इति सूत्रस्थभाष्यप्रमाणोपष्टम्भप्रकाशनपरं मूलग्रन्थसिद्धान्तसिंहगजमांसकबलीकृतम् । न ह्यचेतनस्य शास्त्रस्य स्वदेशं विहायान्यदेशगमनासम्भवात्काष्ठवदपकर्षणेन स्वरितत्वेनाधिक्रियमाणस्य चकारेणानुकृष्यमाणस्य चानेकदेशसम्बन्धकल्पना अप्रामाणिकी । अचेतनस्यान्यदेशगमनासम्भवेऽपि 'कुप्वोᳵकᳶपौ च' इति सूत्रभाष्यव्याख्यानावसरे 'अपरोऽधिकारः प्रतियोगं तस्यानिर्देशार्थ इति 'योगे योग उपतिष्ठते' इति भाष्यस्थं प्रतियोगं इति प्रतीकमुपादाय 'यस्य स्वरितत्वमासज्यते तत्सदृशानि शब्दान्तराणि योगान्तरेऽनुमीयन्ते सादृश्यात्तु तत्वाध्यवसायः' इति कैयटेनासज्यमानस्वरितत्ववत्सूत्रघटकशब्दसदृशशब्दस्य विधिदेशे सम्बन्ध इति बोधनात्स्वदेशात्तयोरपकर्षणाभावेऽपि कल्पितस्य स्वसदृशस्य शब्दस्य काष्ठवदपकर्षणेनानेकदेशसम्बन्धकल्पनायाः प्रामाणिकत्वात् । अत एव 'षष्ठी स्थानेयोगा' इति सूत्रे 'संप्रत्ययमात्रम्' इति भाष्यप्रतीकमुपादाय 'स्वरितत्वप्रतिज्ञानादुत्तरेषु योगेषु—' इति कैयटे उक्तम् । तत्रैवोद्योते 'अनुमानम्' इति कैयटप्रतीकमुपादाय 'उच्चारित एव प्रत्यायकः—' इत्यणुदित्सूत्रभाष्यविरुद्धमिदम्, तस्माद्बोद्धुरनुमानपूर्वकमुच्चारणम्, न त्वाचार्यस्य—' इति स्पष्टमुक्तम् । नचैवं स्वदेशादनपकर्षणेनान्यदेशगमनासंभवे एकदेशस्थत्वं तयोरपीति एकदेशस्थत्वस्य परिभाषामात्रविषयकत्वप्रतिपादनपरं भाष्यमसङ्गतमेवेति शङ्क्यम्, दीपदृष्टान्तप्रदर्शनपरभाष्येण मध्ये व्यापारस्य बोधनात् तस्य च उक्तोभयोरसंभवेन तयोरेकदेशस्थत्वस्य दुर्वचत्वात् । ननु उक्तोभयोरप्यर्थबोधानन्तरमेव सदृशशब्दकल्पनसम्भव इति मध्ये व्यापारो वर्तत एव, अतस्तयोरेकदेशस्थत्वं सूपपादमिति चेत्, न; समानानुपूर्व्यवच्छिन्नशब्दस्वरूपकल्पने तदर्थबोधस्यानावश्यकत्वात्, स्वजन्यवाक्यार्थबोधजन्यान्यदेशगमनासंभवप्रतीतिजन्यसदृशशब्दकल्पनाजन्यशब्दस्वरूपोपस्थितिजन्योपकारकत्वस्य वक्तव्यत्वेन दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात्, 'एकदेशस्थ—' इत्यादिभाष्याननुगृहीतस्य तयोरेकदेशस्थत्वापादनस्य दूरापास्तत्वाच्च, क्वचिच्छब्दाधिकार इत्याश्रयणस्याप्रामाणिकत्वापत्तेश्च । तस्मात् 'एकदेशस्थः—' इत्यादिभाष्यं परिभाषामात्रविषयकमित्यङ्गीकर्तव्यम् । एतदेवाशयानेन भगवता 'षष्ठी स्थाने—' इत्यत्र 'काश्चिदे-

SGDF
Sri Gangeshwari Digital Foundation

एतच्च पक्षद्वयसाधारणं भाष्यम्, पक्षद्वयेऽपि प्रदेशैकवाक्यताया

कदेशस्थः—' इत्यादिकमुक्तं परिभाषाशास्त्रे, अन्यथा 'अदसो मात्' इत्यादौ शक्तिग्राहक एव शास्त्रे ब्रूयात्। 'षष्ठी स्थानेयोगा' इत्यस्य शक्तिग्राहकत्ववादस्तु शब्देन्दुमरीचिमालायामस्मदीयायां बहुधा दूषितः। एवं चोक्तभाष्यं परिभाषामात्रविषयकमिति कैयटेनाभिप्रेतम्। अत एव समर्थसूत्रे 'परिभाषा पुनरेकस्था सती कृत्स्नं शास्त्रमभिज्वलयति प्रदीपवत् तद्यथा— प्रदीपः एकदेशस्थः सर्वं वेश्माभिज्वलयति' इति भाष्यव्याख्यानावसरे 'परिभाषा पुनः' इति प्रतीकमुपादाय 'लिङ्गोपादानेन परिभाषा क्रियमाणा यत्र यत्र तल्लिङ्गोपलम्भः तत्तद्व्याप्नोतीत्यर्थः। प्रदेशान्तरेषु परार्थतासाम्यात् अधिकारपरिभाषयोरभेदेन व्यवहारो भाष्यकारस्य। 'अधिकारो नाम त्रिप्रकारः' इति कैयटेन व्याख्यातम्, अत एव 'कुप्वो≍क≍पौ च' इति सूत्रे कैयटे 'सर्वशास्त्राभिज्वलनं परिभाषाधर्मः' इत्युक्तम्। अत एव च 'पूर्वत्रासिद्धम्' इति सूत्रे कैयटे 'सर्वशास्त्रव्यापित्वनिरासार्थं परिभाषात्वं नादृतम्' इत्युक्तम्। तथा च 'परिभाषाविषये' इति पूर्वग्रन्थः समीचीन एवेति भावः॥ ननु 'पूर्वत्रासिद्धम्' इति सूत्रस्थभाष्यप्रामाण्येन परिभाषाविषये उपेक्षाबुद्धिःसंभवतीति कार्यकालपक्षे विधिदेशस्थत्वमेव परिभाषाणाम्, न पठितदेशस्थत्वम्। अतश्च व्याहतमेव भवत्येकदेशस्थत्वम्। अतो दृष्टान्तवैषम्येण सर्वेषां संज्ञाधिकारशास्त्राणामपि वैषम्ये तत्परतयापि भाष्यस्य लापनीयतया न संगच्छत एव 'एतदेव–इति' पूर्वग्रन्थ इत्यत आह— **एतच्चेति**। 'षष्ठी स्थाने—' इति सूत्रस्थैकदेशस्थ इत्यादीत्यर्थः। चकारःसमुच्चायको भवति कैयटस्यापि॥ **पक्षद्वयसाधारणमिति**। उपेक्षाबुद्धिकारणीभूतनैरर्थक्यज्ञानाभावादुपेक्षाबुद्ध्यसंभवेन परिभाषाशास्त्रीयोद्देश्यतावच्छेदकधर्मप्रकारकज्ञाने अपेक्षाबुद्धेरेव संभवात्स्वदेश एव तादृशबोधजननेन स्वदेशीयत्वमेव तेषाम्, ततश्च पठितदेशस्थत्वादेकदेशस्थत्वेन वैषम्याभावात् परिभाषारूपाधिकारविषयकयोर्भाष्यकैयटयोः पक्षविशेषानुपक्रमेण प्रवृत्तयोःसङ्कोचे मानाभावात्पक्षद्वयेऽपि लक्ष्यभूतपरिभाषाधिकारपरत्वस्य वक्तव्यतया दृष्टान्तदार्ष्टान्तिकयोर्वैषम्याभावे पूर्वग्रन्थः संगत एव। 'पूर्वत्रासिद्धम्' इति सूत्रस्थमपि भाष्यं

SGDF
Sri Gangeshwari Digital Foundation

नोपेक्षाबुद्धया परिभाषादेशे जनितस्य संस्कारस्य लोपेन विधिदेश एव पुनर्वाक्यार्थबोधे विधिदेशस्थत्वेनासिद्धत्वस्याप्रसक्तिरित्यभिप्रायकम् , अपि तु परिभाषादृष्ट्या असिद्धत्वेऽपि विध्याकाङ्क्षयैव गुणाकाङ्क्षोत्थापनादुपजीव्यविरोधस्यान्याय्यत्वेन परिभाषादृष्ट्या त्रैपादिकासिद्धत्वस्य दुर्वचत्वाद्विधिदेशे आकर्षणतुल्या परिभाषाविधेयपदोस्थितिः इत्याशयकम्, इति न तद्विरुणद्धीति भावः ॥

ननु कार्यकालपक्षे विध्येकवाक्यतया वाक्यार्थबोधे सर्वशास्त्राभिज्वलनस्य निर्विवादतया व्यवहर्तृन्यायेन तदभिप्रायकमेव भवत्येकदेशस्थत्वप्रतिपादनम्। पक्षविशेषानुपक्रमेण प्रवृत्तमपि भाष्यं दीपदृष्टान्तप्रदर्शनपरं वेश्मगतस्यैव दीपस्य यथा वेश्मस्थितपदार्थप्रकाशकत्वम् , तथा प्रदेशगतस्यैव परिभाषाशास्त्रस्य विधिशास्त्रीयार्थनिर्णायकत्वमिति बोधयति । किञ्च ‘पूर्वत्रासिद्धम्’ इति सूत्रस्थेन ‘यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्—’ इति भाष्येण बोधितं ‘अयादिभ्यः परैव प्रगृह्यसंज्ञा’ इति ‘अदसो मात्’ इति सूत्रस्थभाष्यानुगृहीतं विधिदेशस्थत्वं नैव शक्यमपलपितुम् । अतश्च भाष्यस्य पक्षद्वयसाधारण्यवर्णनं नातीव हृदयङ्गममित्यत आह— **पक्षद्वयेऽपीति** । यथा प्रदीपः प्रभाद्वारा स्वाश्रयगृहेणैकीभूतः प्रतीयमानः पदार्थान्गृहस्थितान्प्रकाशयति परिभाषाशास्त्रमपि तथैव विशेषणदलोपस्थितिद्वारां, स्वघटकपदोपस्थितिद्वारा वा प्रदेशेनैकवाक्यतापन्नं सद्विधिशास्त्रीयविशिष्टवाक्यार्थबोधजनकमिति परमवश्यमङ्गीकर्तव्यम् , इति बोधयदेव प्रदीपदृष्टान्तावष्टब्धं भाष्यं पक्षद्वयेऽप्येकवाक्यतायामेकदेशस्थत्वे च भवत्यनुग्राहकमित्याशयानो मूलकारः पक्षद्वयसाधारण्यमस्य भाष्यस्य निर्विशङ्कं प्रतिपादयति, विधिदेश एवेति विशेषानादरेण ‘संभवत्येकवाक्यत्वे वाक्यभेदस्यान्याय्यत्वात्’ यथोद्देशेऽपि सर्वशास्त्राभिज्वलनमादाय ऐकरूप्ये संभवति वैरूप्यकल्पनस्य अन्याय्यत्वाच्च, व्यवहर्तृन्यायस्य पक्षद्वयेऽपि सूपपादत्वाच्च, कार्यविधायकशास्त्रीयाकाङ्क्षाप्रयोज्योपस्थितिविषयीभूतं संज्ञापरिभाषाशास्त्रमिति ‘कार्यकालं संज्ञापरिभाषम्’ इति परिभाषया बोधनादचेतनस्य शास्त्रस्य स्वदेशपरित्यागासंभवाच्च, संगतमेव भवति ‘पूर्वत्रासिद्धम्’ इति सूत्रस्थम् ‘यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्’ इति न तद्विरोधः । तत्र परिभाषाघटकं पदमुपस्थितं द्रष्टव्यमित्यर्थाश्रयणेन तद्भाष्यब-

इतः प्रतीतेः ।

लान्नैकदेशस्थत्वं निह्नोतुं शक्यम् । ‘अयादिभ्यः परैव प्रगृह्यसंज्ञा—’ इति भाष्यन्तु संज्ञाशास्त्रेषु कार्यकालपक्षाश्रयणसामर्थ्यमूलकमेवेति न तदपि विरुणद्धि । विशेषणदलोपस्थितिद्वारा वा प्रदेशगतत्वस्य परिभाषाशास्त्रेषु पक्षद्वयेऽपि सुवचत्वाच्च । अयमत्र संग्रहः ।

परिभाषां यथोद्देशे कार्यकालेऽपि पण्डिताः ।
प्रदेशेनैकवाक्यत्वादेकदेशस्थितां विदुः ॥ १ ॥

संज्ञा पुनर्यथोद्देशे स्मरणेनोपकारिका ।
कार्यकाले प्रदेशस्था तस्मान्नैकत्र तिष्ठति ॥ २ ॥

पक्षद्वयेऽप्यैकरूप्यं भाष्यकैयटानुगृहीतं समर्थयति— **प्रदेशैकवाक्यताया इति** ॥ विध्येकवाक्यताया इत्यर्थः । **इत इति** ॥ प्रदीपदृष्टान्तादित्यर्थः । प्रदीपः प्रभाप्रसरणद्वारा प्रदेशेनैकीभूतः प्रतीयमानः सर्वगृहप्रकाशको भवति, तथा परिभाषाशास्त्रमपि स्वविधेयविशेषणदलोपस्थितिद्वारा, स्वविधेयस्वघटकपदोपस्थितिद्वारा वा विध्येकवाक्यतापन्नं सत्सर्वशास्त्रोपकारकमिति दीपदृष्टान्तप्रदर्शनपरभाष्येण बोधनेन विध्येकवाक्यतायाः सूपपादत्वात्पक्षद्वयेप्येकदेशस्थत्वं सूपपादम् । अतश्च प्रकृतभाष्यस्य पक्षद्वयसाधारण्यकल्पनं युक्तमेव । यत्तु ‘इतः’ इति प्रतीकमुपादाय ‘उक्तभाष्यादित्यर्थः’ इति भैरवमिश्रादयः, तत्पूर्वापरपरामर्शाभावपरिदूषितम् । प्रकृतभाष्यस्य पक्षद्वयसाधारण्यसमर्थनहेतुपरतया ‘प्रदेशैकवाक्यताया इतः प्रतीतेः’ इति ग्रन्थस्य प्रवृत्तत्वेन ‘इदं भाष्यं पक्षद्वयसाधारणम्, अस्माद्भाष्यात्प्रतीतेः इत्युक्तेरसाङ्गत्यात् । यदि ‘अस्माद्भाष्यात्’ इत्यस्य ‘दीपदृष्टान्तप्रदर्शनपरभाष्यात्’ इत्यर्थो वर्ण्यते, तदापि दीपदृष्टान्तप्रदर्शनपरभाष्याद्दीपदृष्टान्तप्रदर्शनपरं भाष्यं पक्षद्वयसाधारणमित्युक्तिरसङ्गतैव । मम तु दीपदृष्टान्ताद्विध्येकवाक्यतायाः प्रतीतेः, दीपदृष्टान्तप्रदर्शनपरं ‘कश्चिदेकदेशस्थः—’ इत्यादिभाष्यं पक्षद्वयसाधारणमित्युक्तिः सङ्गच्छत एव । एतेन ‘इदं चिन्त्यम्, संस्कारमात्रस्यैव ज्वलनशब्दार्थत्वे बाधकाभावेन एकवाक्यत-

SGDF
Sri Gurgeshwari Digital Foundation

येति निवेशे मानाभावात्, स्वदेशे गृहीतवाक्यार्थबोधस्य तत्र विधौ स्मृतिमात्रेण तत्तत्संस्काराभिप्रायेणैव 'एकदेशस्थः' इत्युक्तेरुपपत्तेश्च । एकवाक्यतया संस्कारकत्वे हि अधिकारस्यापि तथात्वेन ततो विशेषाभिधित्सया तथोक्त्यसङ्गतिः । प्रदीपदृष्टान्तस्तु 'एवमेतत्स्वबुद्धिजननद्वारा—' इत्यन्तेन ग्रन्थेन एकवाक्यतामन्तरैव त्वयैव योजितः स्वबुद्धिजननद्वारेति त्वदुपपादनञ्च एकवाक्यतायां नानुकूलम् । कार्यकालपक्षे तवाप्येवमेव वक्तव्यत्वात् । न हि तवापि कार्यकालपक्षे परिभाषाणां स्वदेशे वाक्यार्थभाव बाधकाभावात्, 'संज्ञाशास्त्रस्य तु–' इति वक्ष्यमाणविशेषोक्त्ययोगाच्च । न हि स्वबुद्धिरेकवाक्यतया बोधः, किन्तु स्मृतिमात्रम् । संस्कार्यविधीनामनेकत्वेन युगपच्छ्रोतृबुद्ध्यनारोहेण तावतामुपस्थानासंभवाच्च—' इति राघवेन्द्राचार्योक्तमपास्तम् । संभवत्येकवाक्यत्वे वाक्यभेदस्यान्याय्यत्वेन संस्कारमात्रस्य ज्वलनशब्दार्थत्वे दोषध्रौव्येण एकवाक्यतयेति निवेशस्यावश्यकत्वात्, दीपदृष्टान्तप्रदर्शनपरभाष्यस्यैव पूर्वोक्तरीत्या एकवाक्यतयेति निवेशे गमकत्वाच्च । 'एकदेशस्थः' इत्युक्तिरपि न स्वदेशे गृहीतवाक्यार्थबोधस्य तत्र विधौ स्मृतिमात्रेण तत्तत्संस्काराभिप्रायेण प्रवृत्ता इति न वर्षसहस्रैरपि प्रतिपादयतुं शक्यते । दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात् । पक्षविशेषानुपक्रमेण प्रवृत्ताया एकदेशस्थइत्युक्तेर्यथोद्देशे समन्वयासंभवाच्च । कार्यकालानुरोधेन संभवत्येकवाक्यत्वे यथोद्देशेऽप्येकवाक्यताङ्गीकारस्यावश्यकत्वाच्च । एकवाक्यतया विध्युपकारकत्वे अधिकारस्यापि तथात्वेनेत्यसत् । दीपदृष्टान्तवैषम्येण तथात्वस्य दुरुपपादत्वात् दीपदृष्टान्तवैषम्यञ्च पूर्वमेवोपदर्शितम् । प्रदीपदृष्टान्तस्तु 'एवमेतत्स्वबुद्धिजननद्वारा–' इत्यन्तेन ग्रन्थेन एकवाक्यतामन्तरा त्वयैव योजित इत्यप्यनादरणीयम् । स्वं परिभाषाशास्त्रं तस्य बुद्धिः, जननम् उत्पत्तिसाधनं यस्येति व्युत्पत्त्या स्वजन्यवाक्यार्थबोधजन्यार्थिकनिषेधपरविशेषणदलोपस्थितिद्वारा स्वजन्यवाक्यार्थबोधजन्यस्वघटकपदोपस्थितिद्वारा वा सर्वशास्त्रोपकारकमित्यर्थेन वाक्यार्थैकवाक्यतया पदैकवाक्यतया वा विधिशास्त्रोपकारकं परिभाषाशास्त्रमित्यभिप्रायेणैव एवमेतदित्यादिग्रन्थस्य योजितत्वात् । स्वबुद्धिजननद्वारेत्युपपादनस्योपदर्शितरीत्या विध्येकवाक्यतायामेवानुकूल्यात् । कार्यकालपक्षे नास्माभिरेवमुच्यते । अपि तर्हि परिभाषाशा-

तत्रैतावान्विशेषः— यथोद्देशे परिभाषादेशे सर्वविधिसूत्र-

स्त्रविधेयविशेषणदलोपस्थित्या तद्विधेयतद्घटकपदोपस्थित्या वा वाक्यार्थैकवाक्यतया पदैकवाक्यतया वा त्रैपादिकविध्युपकार इत्यङ्गीकुर्मः । 'संज्ञाशास्त्रस्य तु—' इति वक्ष्यमाणविशेषोक्तिरपि संज्ञाशास्त्रबोधं विना विधिवाक्यार्थबोधस्याप्यसंभवेन अत्याकाङ्क्षितत्वान्न स्वदेशे विधिशास्त्रीयलक्ष्यसंस्कारोपयोगिवाक्यार्थबोधप्रयोजकवाक्यार्थबोधाभावः, इति तद्देशे वाक्यार्थबोधस्य तद्देशस्थत्वे तन्त्रत्वेन तदभावे तदभाव इति विशेषप्रदर्शनपरेति युज्यत एव । स्वबुद्धिश्च स्वजन्यवाक्यार्थबोध एव, न तु स्मरणम् । संभवत्येकवाक्यत्वे वाक्यभेदस्यान्याय्यत्वात्, दीपदृष्टान्तवैषम्याच्च । एवञ्च 'इदं चिन्त्यम्' इत्यादिविजृम्भणस्य स्फुटं विप्रलम्भत्वम् । अतश्च स्वयमाहोपुरुषिकया शशविषाणवच्च शब्दमात्रीकृतः तन्निरूपणश्रमो व्यर्थः परेषामिति निश्चप्रचम् । तथा च परिभाषाशास्त्रस्य कार्यकालपक्षेऽपि स्वदेशस्थत्वमेव । एकदेशस्थस्य सर्वशास्त्राभिज्वलनं तु पक्षद्वयसाधारणम् । अतः 'षष्ठी स्थाने योगा' इति सूत्रस्थं 'कश्चित्—' इत्यादिभाष्यं पक्षद्वयाभिप्रायकमेवेति भट्टनागेशोपाध्यायगूढाकूतमित्यलं पल्लवितेन ॥

ननु पक्षद्वयेऽपि परिभाषाशास्त्रविधेयदलोपस्थित्या विधिवाक्यार्थपरिष्कारेण 'कश्चिदेकदेशस्थः—' इत्यादिभाष्यस्य पक्षद्वयसाधारण्यकल्पने परिभाषाविषये पक्षद्वयाश्रयणं विफलम्, अन्यतरेणैव निर्वाहात् । आकाङ्क्षाभेदेन पक्षभेद इति तु न युक्तम् । फलाभावे तस्य अकिञ्चित्करत्वात् । त्रैपादिकविध्युपकारकत्वमपि यथोद्देशे निषेध्यविशेषज्ञानेन निषेधपर्यवसायिवाक्यार्थः, इति निषेध्यविशेषपरिज्ञानदशायां निषेध्यासंभवात्पूर्वशास्त्रीयस्यार्थिकानिषेधरूपकार्यज्ञानस्य कर्तव्यत्वाभावेन सूपपादम् । तथा च परिभाषाद्वयेऽपि परिभाषापदग्रहणस्वारस्यात् पक्षयोर्वैलक्षण्यं वक्तव्यम् । तच्च कार्यकालपक्षे कार्येण आकर्षणात् तद्देशस्थत्वमेवेति, न स्वदेशस्थत्वम् । ततश्च कार्यकाले नैकदेशस्थत्वमिति उक्तभाष्यस्य पक्षद्वयसाधारण्यकल्पनमयुक्तमित्यत आह— **तत्रेति** ॥ पक्षयोरुभयोरित्यर्थः । विशेषं निरूपयति— **यथोद्देशेत्यादिना** । **परिभाषादेशे इति** । परिभाषापाठोपलक्षितदेशे इत्यर्थः । सपादसप्ताध्याय्यामिति

बुद्धावात्मभेदं परिकल्प्य तैरेकवाक्यता परिभाषाणाम् । तदुक्तं

यावत् । वृत्तिमत्वं सप्तम्यर्थः । **सर्वविधिसूत्रबुद्धाविति** । सपादसप्ताध्यायी वृत्त्यौपश्लेषिकाधिकरणबोधकसप्तम्यन्तादिघटितविधिशास्त्रबुद्धावित्यर्थः । **आत्मभेदमिति** । आत्मशब्दोऽत्र आत्मविधेयपरः । आत्मा च परिभाषाशास्त्रम् । भेदशब्दस्य आवृत्तिरर्थः । तथा च परिभाषाशास्त्रविधेयविशेषणदलावृत्तिम्, परिभाषाशास्त्रविधेयतद्घटकपदावृत्तिमिति च अर्थः । **एकवाक्यतयेति** । वाक्यार्थैकवाक्यता, पदैकवाक्यता वेत्यर्थः । **परिभाषाणामिति** । अस्य यथोद्देशे इत्यत्रान्वयः । क्रियते इति शेषः । एवञ्च परिकल्प्येत्यत्र तुल्यकर्तृकत्वाल्ल्यबुपपद्यते । यथोद्देशपक्षे निषेधपर्यवसायिवाक्यार्थबोधानन्तरं पूर्वशास्त्रीयमार्थिकनिषेधरूपं कर्तव्यमेव, इति परिभाषादृष्ट्या त्रैपादिकानामसिद्धत्वेन तैरेकवाक्यताया दुर्वचत्वात् परिभाषाकाङ्क्षया सापादिकविध्याकाङ्क्षामुत्थाप्य कल्पितया वाक्यार्थैकवाक्यतया पदैकवाक्यतया वा लक्ष्यसंस्कारः, इत्यार्थिकनिषेधपरपरस्मिन्नित्यादिविशेषणदलानाम्, परिभाषाशास्त्रविधेयतद्घटकपदानां वा ‘प्रतिप्रधानं गुणावृत्तिन्यायेन आवृत्तिं कल्पयित्वा एकवाक्यता क्रियते’ इति निर्गलितार्थः । एवञ्च यथोद्देशपक्षे परिभाषाणां सापादिकविधिमात्रोपकारकत्वम्, कार्यकाले तु त्रैपादिकविधिमात्रोपकारकत्वम्, इति वैलक्षण्यात् पक्षद्वयाश्रयणस्यावश्यकतया पक्षद्वयेऽपि परिभाषाविधेयविशेषणदलोपस्थित्या परिभाषाविधेयतद्घटकपदोपस्थित्या वा विधिवाक्यार्थपरिष्कारः, इत्याश्रयणेन स्वदेशस्थत्वादेकशस्थत्वस्य सूपपादतया उक्तभाष्यस्य पक्षद्वयसाधारण्यकल्पनं युक्तमेव । न च ‘केचित्तु परिभाषाविषये—’ इत्यादिना ‘कार्यकालपक्षे तु त्रिपाद्यामप्युपस्थितिरिति विशेषः—’ इत्यन्तेन महता प्रबन्धेन पक्षवैलक्षण्यस्य प्रतिपादितत्वेन ‘तत्रैतावान्विशेषः—’ इत्यारभ्य पुनर्विशेषप्रतिपादनमनर्थकमिति शङ्क्यम् । पक्षद्वयेऽप्येकदेशस्थत्वप्रतिपादनस्य स्थूणानिखननन्यायेन द्रढीकरणाय पुनर्वैलक्षण्यप्रतिपादनेनादोषात् । एतेन ‘संस्कार्यविधीनामनेकत्वेन युगपच्छ्रोतृबुद्ध्यनारोहेण तावतामुपस्थानासंभवाच्च’ इति राघवेन्द्राचार्योक्तमपास्तम् । ‘प्रतिप्रधानं गुण आवर्तते’ इति न्यायेन एकस्यैव विधेरेकया परिभाषया संस्कारः, अपरस्य तु विधेरावृत्तया अपरया संस्कारः, इति एकप-

‘क्ङिति च’ इति सूत्रे कैयटे— ‘यथोद्देशे प्रधानान्यात्मसंस्काराय संनिधीयमानानि गुणभेदं प्रयुञ्जते’ इति । कार्यकाले तु तत्तद्विधिप्रदेशे

रिभाषाविषये एकस्यैव विधेः श्रोतृबुद्ध्यारोहः, इत्यङ्गीकारेणादोषात् । परमाचार्यास्तु ‘एकत्र परिभाषायां तत्तद्विद्ध्युपस्थितिस्तु युगपदेकबुद्ध्युपारोहोऽस्ति—’ इत्युपपादनीयेत्याहुः । ननु यथोद्देशपक्षे गुणाकाङ्क्षया विध्याकाङ्क्षामुत्थाप्य कल्पितया एकवाक्यतया लक्ष्यसंस्कारः इत्यङ्गीकारे ‘त्यदादीनामः’ इत्यादौ ‘तस्मिन्—’ इति गुणाकाङ्क्षया तदर्थबोधानन्तरमाकाङ्क्षोत्थापनम्, एवं ‘षष्ठी स्थाने—’ इति गुणाकाङ्क्षया तदर्थानुसन्धानात्पुनस्तदाकाङ्क्षोत्थापनम्, तथा ‘अलोऽन्त्यस्य’ इत्येतदाकाङ्क्षया तदर्थानुसन्धाने तदाकाङ्क्षोत्थापनम्, इति एकस्यैव विधेरनेकगुणाकाङ्क्षया असकृदाकाङ्क्षोत्थापनम्, इति महद्गौरवम् । अतः प्राचीनानुरोधेनैव परिभाषाणां स्वदेशे वाक्यार्थबोधानन्तरं प्रदेशे सकृदेव स्वबोद्ध्यनियमस्मृतिः, इत्यङ्गीकारे महल्लाघवम्, अतस्तदेवावश्यमाश्रयणीयम्, ततश्च ‘षष्ठी स्थाने—’ इति सूत्रस्थं ‘कश्चिदेकदेशस्थः—’ इत्यादिभाष्यं दृष्टान्तवैषम्यान्न यथोद्देशपक्षाभिप्रायकम् । अतश्च उक्तभाष्यस्य पक्षद्वयसाधारण्यकल्पनं न युज्यत एवेत्यत आह— तदुक्तमिति ॥

अभिप्रेत्येति शेषः । तच्छब्दस्य एकदेशस्थत्वमर्थः । एकदेशस्थत्वमभिप्रेत्योक्तमिति यावत् । **प्रधानानीति** । साक्षाल्लक्ष्यसंस्कारकाणीत्यर्थः । **आत्मसंस्कारायेति** । आत्मीयलक्ष्यधर्मिकसाधुत्वप्रकारकनिश्चितवाक्यार्थबोधसंपादनायेत्यर्थः । **संनिधीयमानानीति** । उपस्थितानीत्यर्थः । **गुणभेदमिति** । परिभाषानियमविधिबललभ्यार्थिकनिषेधपरविशेषणदलावृत्तिम्, परिभाषाविधेयतद्घटकपदावृत्तिं वेत्यर्थः । ‘क्ङिति च’ इत्यस्य परिभाषात्वमाश्रित्य गुणवृद्ध्यन्यतरपदावच्छिन्नविधेयताप्रयोजकगुणवृद्ध्यन्यतरपदश्रवणरूपलिङ्गवत्याः ‘क्ङिति च’ इति परिभाषायाः गुणपदमुच्चार्य विहितो गुणः, वृद्धिपदमुच्चार्य विहिता वृद्धिश्च, क्ङिति न, इत्यर्थेन आर्थिकनिषेधपरक्ङिद्भिन्नमिति विशेषणदलोपस्थित्या, ‘सार्वधातुकार्धधातुकयोः’ इत्यादिविधिवाक्यार्थपरिष्कारः । ततश्च यथोद्देशपक्षे ‘क्ङिति च’ इत्यत्र ‘सार्वधातुकार्धधातुकयोः—’ इत्यादिबुद्ध्या ‘प्रतिप्रधानं गुण आवर्तते’ इति न्यायेन क्ङिद्भिन्नमिति विशेषणदलोपस्थितौ वा-

परिभाषाबुद्ध्या एकवाक्यता— इति ।

क्यार्थैकवाक्यतया क्ङिद्भिन्नयोः ‘ सार्वधातुकार्धधातुकयोः—’ इति विधिवाक्यार्थः परिष्क्रियते । एवं ‘ तस्मिन्—’ इत्यादीनां वाक्यार्थबोधे, विधीनां च वाक्यार्थबोधे लिङ्गपरिज्ञानेनोपप्लुतपरिभाषाविधेयपदनिवेशेन, परिभाषाविधेयतद्घटकपदनिवेशेन वा, वाक्यार्थैकवाक्यतया, पदैकवाक्यतया वा विधिवाक्यार्थपरिष्कारः, इत्यङ्गीकारे गौरवाभावाद्वैषम्याभावेन एकदेशस्थत्वं सूपपादमेव । तथा च कैयटेन यथोद्देशपक्षे लिङ्गेन गृहीतस्वार्थस्मृतिद्वारा विध्युपकारकत्वं नाभिप्रेतम् ; अपि तु स्वबुद्धिजननद्वारैव उपकारकत्वमिति एकदेशस्थत्वमभिप्रेतम् । किञ्च प्राचीनमते विधिप्रदेशेषु अनेकपरिभाषावाक्यानां युगपदुपस्थितानामेकेन नियमितस्यैव अपरेण नियमनम् , इत्येवं सर्वेषामेव विधिद्वारा परस्परैकवाक्यताया आवश्यकत्वेन गौरवाधिक्यमिति तत्पक्षस्य वाक्यभेददोषदुष्टत्वेनाश्रयितुमशक्यत्वात् , स्वमते दृष्टान्तसाम्येन ‘ कश्चिदेकदेशस्थः—’ इत्यादिभाष्यमुक्ताभिप्रायकम् , इति न पूर्वोक्तविरोध इति भावः । ननु ‘ क्ङिति च ’ इति सूत्रे भाष्ये तत्र परसप्तम्याश्रयणे रोरवीतीत्यादौ यङ्लुकः प्रत्ययलक्षणे ‘ क्ङिति च ’ इत्यनेन निषेधः स्यात् , इत्याशङ्क्य ‘ न लुमताङ्गस्य ’ इति परिहृत्य तत्राङ्गपदे स्वरितत्वप्रतिज्ञयाङ्गाधिकारस्थानामेव निषेधः, इति पक्षे ‘ क्ङिति च ’ इत्यस्यानाङ्गत्वेन प्रत्ययलक्षणनिषेधाभावमाशङ्क्य कार्यकालपक्षाश्रयणेन तस्याप्यङ्गाधिकारस्थत्वमाश्रित्य ‘ न लुमता—’ इति निषेधेन प्रत्ययलक्षणप्रापितो निषेधः परिहृतः । अतश्च तन्निषेधोपपादनायारब्धं वार्तिककृता ‘ तन्निमित्तग्रहणं कर्तव्यम् ’ इति वार्तिकं प्रत्याख्यातम् । एवञ्च तद्भाष्यबलात्कार्यकालपक्षे परिभाषाणां विधिदेशीयत्वस्यावश्यकतया स्वदेशस्थत्वस्याभावेन एकदेशस्थत्वं दुरुपपादम्’ ‘ षष्ठी स्थाने—’ इति सूत्रभाष्यस्य पक्षद्वयसाधारण्यं वक्तुं न शक्यत इत्यत आह—**कार्यकाले त्विति**। **तत्तद्विधिप्रदेशेति**। परिभाषाशास्त्रोपकार्यौपश्लेषिकाधिकरणबोधकसप्तम्यन्तादिघटितविधिप्रदेशे इत्यर्थः । **परिभाषाबुद्ध्येति** । परिभाषाशास्त्रविधेयार्थिकनिषेधपरिविशेषणदलोपस्थित्या परिभाषाशास्त्रविधेयतद्घटकपदोपस्थित्या वेत्यर्थः । **एकबाक्यतयेति** । वाक्यार्थैकवाक्यता प-

दैकवाक्यतावेत्यर्थः। अस्य विशेष इत्यनेन संबन्धः। यथा 'सार्वधातुकार्धधातुकयोः–' इत्यादौ लिङ्गपरिज्ञानेनार्थिकनिषेधपराक्ङिद्भिन्नमिति विशेषणदलोपस्थित्या वाक्यार्थपरिष्कारात् 'न लुमता—' इति सूत्रेऽङ्गपदे स्वरितत्वप्रतिज्ञया अङ्गाधिकारस्थसूत्रैकवाक्यतापन्नस्य क्ङिद्भिन्नमित्यस्याप्यङ्गपदेन ग्रहणात् 'न लुमता–' इति निषेधसिद्ध्या रोरवीतीत्यादौ दोषाभाव इति ; भाष्यबलात्कल्पनीये तद्बलात्परिभाषाणां विधिदेशीयत्वाङ्गीकारे प्रमाणाभावः। 'अत एव स्वरितत्वासङ्गवशात्तदधिकारपठितमिव तदधिकारस्थैकवाक्यतापन्नमपि गृह्यते, इति तात्पर्यमुक्तमुद्योते। यदि सर्वमङ्गलामनुरुन्धानो विशेषणदलोपस्थित्या विधिवाक्यार्थपरिष्काराद्यथोद्देशेऽप्यङ्गाधिकारीयसूत्रैकवाक्यतापन्नत्वेन 'न लुमता—' इति निषेधसिद्ध्या कार्यकालपक्षपर्यन्तानुधावनपरं भाष्यमसङ्गतमेवेति वक्तुमाशंसते; स एवं तर्हि प्रत्युच्यते। कार्यकालपक्षे विध्याकाङ्क्षया गुणाकाङ्क्षामुत्थाप्यार्थिकनिषेधपरविशेषणदलोपस्थित्या परिभाषाघटकपदोपस्थित्या वा वाक्यार्थैकवाक्यता, पदैकवाक्यता वाङ्गीक्रियते। ततश्च एकवाक्यताया विधिशास्त्रप्रयोज्यत्वेन विधिशास्त्रीयत्वादङ्गाधिकारीयत्वेन गृहीतुमौचित्यम्। अतः कार्यकालपक्षपर्यन्तानुधावनपरं सङ्गतमेव भवति भाष्यम्। यथोद्देशाश्रयणे तु तत्पक्षे गुणाकाङ्क्षया विध्याकाङ्क्षामुत्थाप्य एकवाक्यता कल्प्यते। अतो गुणशास्त्रप्रयोज्यत्वेन एकवाक्यताया गुणशास्त्रीयत्वाद्विधिशास्त्रीयत्वाभावः स्पष्ट एव। ततश्च एकवाक्यता नाङ्गपदेन गृहीतुं शक्यते, इति खल्वभिप्रेतमुद्योतकारेण। एवञ्च सङ्गच्छत एव भाष्यं 'क्ङिति च' इति सूत्रस्थम्। यत्तु— 'क्ङिति च' इति सूत्रस्थकैयटस्त्वेकदेशिपक्षाशयवर्णनाय प्रवृत्तः इत एवारुच्या भाष्ये 'अथ वा—' इति पक्षान्तरमुपन्यस्तम्—' इति राघवेन्द्राचर्योक्तम्; तत्स्वाभिमतमात्रम्। वस्तुतः प्रवृत्त एव कैयटस्तत्सूत्रस्थः एकदेशिमताशयवर्णनाय। न कोऽपि शक्नोतु तन्निह्नवे, अथापि किमिदमत्रैकदेशिमतम्; परिभाषास्वेव नियामिका 'कार्यकालं संज्ञापरिभाषम्' इति परिभाषानिषेधेष्वपि नियामकत्वेन उपक्षिप्तेति 'अथ वा—' इति पक्षान्तरोपन्यासेन तद्भवत्वस्वरसग्रस्तमेव। अपि तर्हि सादृश्यप्रयोजकीभूतो धर्मः प्रतिपादितः परिभाषात्वव्यापकीभूतैकवाक्यत्वरूपो न जातु च न एकदेशत्वेन कैयटस्य हृदयमधिशेते, इत्यलम्। ये तु— यत्र गुणवृद्धी विधीयेते तत्र क्ङिति नेत्युप-

SGDF
Sri Gurgeshwari Digital Foundation

तिष्ठते इत्येवमियं परिभाषा भवति, इति कैयटेन ‘क्ङिति च’ इत्यस्य परिभाषात्वप्रतिपादनात्परिभाषासादृश्यात्परिभाषात्वकथनमसङ्गतमिति व्याचक्षते । तानेवं प्रतिब्रूमः । ‘अथ वा—’ इति भाष्ये पक्षान्तरोपन्यासेन परिभाषात्वमनादर्तव्यमिति प्रतीयते । अत एव तत्र ‘अथवा—’ इति प्रतीकधरणेन ‘माभूत्परिभाषा—’ इति कैयटेन स्पष्टमुक्तम्, एवमग्रेऽपि न दोषः, कथं ‘कार्यकालं संज्ञापरिभाषम्’ यत्र कार्यं तत्र द्रष्टव्यम्—इति भाष्येण बोधितं परिभाषात्वं सादृश्येनैव निर्वोढुं शक्यत इति । न हि क्लृप्तं परित्यज्य परिभाषात्वमपूर्वं तत्प्रयोजकं सादृश्यकल्पनं शशशृङ्गसमानमिति युज्यते वक्तुम् । विकल्पं च वाक्यभेदं परिहर्तुमार्थिकनिषेधबोधकशब्दनिवेशेन विधिनिषेधयोर्वाक्यार्थैकवाक्यतां सर्वथा यथा स्वीकुर्मः; तथा परिभाषास्वपि निषेधमर्थतः स्वीकृत्यार्थिकनिषेधबोधकशब्दनिवेशेन वाक्यार्थैकवाक्यता विधिपरिभाषयोः स्वीकर्तव्येति बोधनायैव तद्ग्रन्थप्रवृत्तेः । कैयटोक्तरीत्या परिभाषात्वस्वीकारे लैगवायन इत्यादौ दोषापत्तेश्च । स्यादेतत्— ‘सादृश्यं निषेध्याकाङ्क्षया तदेकवाक्यतामात्रेण—’ इत्युद्योतेन निषेधशास्त्राकाङ्क्षया निषेध्यशास्त्राकाङ्क्षोत्थापनप्रतीतेः गुणाकाङ्क्षया विध्याकाङ्क्षेति पर्यवसानाद्यथोद्देशपक्ष एव संभवति, इति कार्यकालपक्षपर्यन्तानुधावनपरभाष्यविरोधो दुर्वारः, निषेध्याकाङ्क्षयेत्यस्य निषेध्यस्य विधिशास्त्रस्याकाङ्क्षया तदेकवाक्यतामात्रेण निषेधशास्त्रवाक्यार्थैकवाक्यतामात्रेणेत्यर्थाश्रयणेन विध्याकाङ्क्षया गुणाकाङ्क्षेति पर्यवसाने कार्यकालपक्ष एवेति भाष्यविरोधाभावात् । एवं चाङ्गाधिकारप्रतिनिर्देशपक्षाश्रयणपर ‘क्ङिति च’ इति सूत्रभाष्येण परिभाषाणां कार्यकालपक्षे विधिदेशीयत्वस्यानङ्गीकारात्पाठितदेशस्थत्वेनैकदेशस्थत्वात् ‘कश्चिदेकदेशस्थम्, इत्यादिभाष्यं पक्षद्वयसाधारणमेवेति वक्तुं युज्यते ।

एवं च

महाभाष्यविरोधोऽत्र सर्वमङ्गलयोहितः ।
युक्तिछुरिकयास्माभिः शतथा शकलीकृतः ॥

तथाहि,– किञ्च परिभाषाविषये कार्यकालपदेन तद्देशस्थत्वाप्रतिपादने ‘क्ङिति च’ इति सूत्रस्थभाष्यविरोधः; तत्र हि तन्निमित्तग्रहणाभावे ‘रोरवीति’

SGDF
Sri Gangeshwari Digital Foundation

इत्यत्र निषेधमाशङ्क्य 'न लुमताङ्गस्य' इति परिहृत्य तत्राङ्गपदे स्वरितत्वप्रतिज्ञया अङ्गाधिकारस्थानामेव निषेध इति पक्षे 'क्ङिति च' इत्यस्य अनाङ्गत्वेन निषेधाभावमाशङ्क्य कार्यकालपक्षाश्रयणेन तस्याप्यङ्गाधिकारस्थत्वमाश्रित्य 'न लुमता—' इति निषेधेन प्रत्ययलक्षणेन प्राप्तनिषेधः परिहृतः। तन्मते तत्पक्षे तद्देशे उपस्थितावपि व्यवहर्तृदृष्टान्तेन तस्याङ्गाधिकारस्थत्वासंभवात्तेन निषेधाप्राप्त्या भाष्यासंगतिः, इति वाचां प्रचारो विजातीयविवादविक्रमप्रापणनिपुणस्य विपश्चितस्सर्वमङ्गलाकारस्यात्यन्तापरिमृष्टशास्त्रस्वप्रतिभाहेतुर्नात्र फलेग्रहिरिति दूरतः क्रियते। उद्योतेनैव खलु स्पष्टं परिहृतो भवति विरोधः, तदप्यपह्नोतुमुपक्रममाणस्य प्रसृमरडामरस्यासूयामात्रविवर्तवागाडम्बरस्यार्वाचीनस्यान्तर्वाणिनस्सर्वमङ्गलाकारस्य 'न लुमता—' इत्यत्राङ्गपदे स्वरितत्वप्रतिज्ञायास्तस्याधिकारपरत्वसिद्धये आवश्यकत्वेन तेनैव स्वरितेनाधिकं कार्यं भवतीत्यर्थमाश्रित्याङ्गाधिकारस्थत्वाभावेऽपि तत्रैव तदेकवाक्यतापन्नेऽपि 'न लुमता' इत्यस्य प्रवृत्तिः, इति तदाशय इति तत्रत्यविवरणोक्तभाष्यसमर्थनमपि न युक्तम्। यथोद्देशेऽपि 'क्ङिति च' इत्येतद्देशेऽपि त्वन्मते अङ्गाधिकारस्थविधेरुपस्थित्या तदेकवाक्यतामात्रेण तस्मिन्विवरणोक्तरीत्या 'न लुमता—' इत्यस्य प्रवृत्तिसंभवेन कार्यकालपक्षपर्यन्तानुधावनपरभाष्यासांगत्यापत्तेः, इति उद्भावितविरोधसमर्थनाय विषयविशेषकल्पनाक्लेशोऽपि न सम्यक्, पूर्वमस्मदुपवर्णितेनैवोद्योताशयेन तदुपकल्पितस्य भाष्यासाङ्गत्यस्य परिहारात्। यदपि—'अत एव 'पूर्वत्र—' इति सूत्रे असिद्धत्वेन त्रिपाद्यां परिभाषाणामप्रवृत्तिमाशङ्क्य प्रासादस्थराजदारन्यायेन पिशाचवद्वा तदर्थग्रहणेन तदनुरोधेन विधिवाक्यार्थप्रतिपत्त्या दोषस्सुपरिहरः, इत्याशयेन 'यद्यपीदं तत्रासिद्धं तत्त्विह सिद्धम्' इति ग्रन्थेन समाधाय एवमपि उपेद्ध इत्यत्र निषेधं प्रति गुणस्यासिद्धत्वेन निषेध्यगुणस्यैवासत्त्वप्रतिपत्या तत्सत्तामुपजीव्य प्रवर्तमानस्य निषेधस्याप्रवृत्तिवदत्रापि परशास्त्रस्यासिद्धत्वेन तस्मिन्नसत्वप्रतिपत्तिद्वारा पूर्वशास्त्रप्रवृत्तिप्रयोजकत्वप्रतिबन्धकत्वयोरभावबोधनेनान्यतराकाङ्क्षयापि तत्रोपस्थित्या एकवाक्यतया तत्संस्कारो दुर्वच एव, इत्याशयेन 'कथम्' इति प्रश्ने 'कार्यकालं संज्ञापरिभाषम्' यत्र कार्यं तत्रैवोपस्थितं द्रष्टव्यमित्यवधारणपूर्वकं तद्देशस्थत्वप्रतिज्ञानेन तदर्थोपसंहारपरं भाष्यं सङ्गच्छते, इति तस्यैव वितण्डापण्डितस्य महाभाष्या-

शयविशेषोपवर्णनप्रावीण्यप्रकटनं प्राचीनसिद्धान्तपद्धतिपरिशीलनपेशलम्, तदप्यज्ञानविजृम्भितमन्धे तमसि मज्जनम्। आर्थिकनिषेधे परिभाषाशास्त्रविधेये कर्तव्ये त्रिपाद्याः 'पूर्वत्रासिद्धम्' इत्यनेनासिद्धत्वात्सापादिकानां परिभाषाणां त्रैपादिकविधिसान्निध्याभावो यथोद्देशे, 'यद्यपीदं तत्रासिद्धम्—' इति ग्रन्थेनाशङ्कितः। अनन्तरं च सापादिकदृष्ट्या त्रैपादिकस्य शास्त्रबलादसिद्धत्वेऽपि त्रैपादिकदृष्ट्या सापादिकस्य शास्त्रबलान्नासिद्धत्वमित्यभिमानः 'तत्त्विह सिद्धम्—' इति ग्रन्थेनोद्घाटितः। ततश्च राजा यथा स्वभृत्यं कर्मण्यमन्धं कर्म न कारयति, तथा राजस्थानीयं प्रधानं विधिशास्त्रम्, अन्धस्थानीयमदृष्टं परिभाषाशास्त्रं नाकर्षत्येव। अतश्च त्रैपादिकविधिदृष्ट्या सापादिकपरिभाषाणां 'पूर्वत्राासिद्धम्' इति शास्त्रेण असिद्धत्वं दुर्वारमिति हेतोः 'कथम्' इति पृष्टम्। 'कार्यकालं संज्ञापरिभाषम्' इत्युत्तरं दत्तम्। अनिष्पन्नत्वप्रकारकज्ञानविषयीभूतानां त्रैपादिकशास्त्राणां कथं सापादिकपरिभाषाकर्षकत्वम्, इत्याशङ्कायां 'यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्' इत्यभिहितम्। 'कार्यं' इत्यस्य कार्यविधायकशास्त्रमित्यर्थः। 'उपस्थितम्' इत्यस्य परिभाषाशास्त्रविधेयार्थिकनिषेधपरविशेषणदळं, परिभाषाशास्त्रविधेयतद्घटकपदं, इति वा शेषः। सापादिकपरिभाषाशास्त्रीयस्यार्थिकनिषेधरूपकार्यस्य त्रैपादिकविध्याकाङ्क्षोत्थापिताकाङ्क्षामूलकत्वेन त्रैपादिकविधिशास्त्रप्रयोज्यत्वात् त्रैपादिकविधिशास्त्रमुपजीव्य जायमानं पूर्वशास्त्रीयं कार्यं कथं तदसिद्धत्वप्रवृत्तिप्रयोजकं स्यात्, उपजीव्यविरोधस्यान्याय्यत्वात्। तथा च नासिद्धत्वप्रवृत्तिरिति भाष्याशयः। एवं च तद्भाष्यं न तद्देशस्थत्वं प्रतिजानीते इति 'तद्देशस्थत्वप्रतिज्ञानेन तदर्थोपसंहारपरं भाष्यं सङ्गच्छते' इत्युक्तिः सिकताकूपनिर्माणनैपुणीनाडिन्धमेति निश्चप्रचम्। यच्च— 'भाष्ये तत्रैवोपस्थितमित्यपपाठः इति विवरणोक्तिस्तु कैयटादिविरोधाच्चिन्त्यैव' इति जल्पितम्; तदपि तुच्छम्; 'ईदूदेद्द्विवचनं प्रगृह्यम्' 'अदसो मात्' 'ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे' इत्यादौ तद्भाष्ये 'कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं दृष्टव्यम्' इत्यवधारणारहितपाठदर्शनेन अत्राप्यवधारणारहित एव पाठस्साधुरित्युद्योताशयात्। न च कार्यकालमित्यस्मिन् दर्शने 'संज्ञापरिभाषाणामत्यन्तपारार्थ्यान्न स्वातन्त्र्येण कार्यावगमहेतुत्वं केवलमाचार्येण लाघवायानेकप्रधानाङ्गभावप्रतिपत्तये पृथ-

गुपदेशः कृतः । ततश्च ‘तस्मिन्निति निर्दिष्टे पूर्वस्य’ इत्यनेन न किञ्चित्क्रियते, नापि ‘झलो झलि’ इत्यनेन, किं तर्हि संहत्य कार्यं क्रियते । ततो झल्यनन्तरे पूर्वस्य सकारस्य झलः परस्य लोप इति वाक्यार्थ इत्येकवाक्यतायां पौर्वापर्याभावादसिद्धत्वाभावः, इति ‘पूर्वत्रासिद्धम्’ इति सूत्रस्थेन कैयटेन परिभाषाणां कार्यकाले सापादिकत्वाभावो बोध्यते । अतश्च नैकदेशस्थत्वसंभव इति शक्यं वदितुम् । त्रैपादिकविध्याकाङ्क्षोत्थापनेन कल्पितमार्थिकनिषेधरूपं कार्यं पूर्वशास्त्रीयं त्रैपादिकविध्युपजीव्यमिति उपजीव्यविरोधस्यान्याय्यत्वेनासिद्धत्वं मा प्रसाङ्क्षीत्, इत्याशयेनासिद्धत्वप्रयोजकस्य पौर्वापर्यस्यैवाभावो निरूपितः न पुनस्तद्देशस्थत्वाभिप्रायेण । अत एव एकवाक्यतायामित्युक्तम्, अन्यथा पौर्वापर्याभावे तद्देशस्थत्वस्यैव हेतुत्वं स्यादुपपादितम् । ‘इको गुण—’ इति सूत्रस्थोऽपि कैयटः पौर्वापर्यव्यवहारप्रयोज्यस्यानभ्युपगमादसिद्धत्वस्य पौर्वापर्यमकिञ्चित्करमेवेत्याभिप्रायकः । ‘कार्यार्थत्वाद्गुणानां कार्यस्य च प्रधानत्वात्प्रधानदेशत्वस्य न्याय्यत्वात्, इति ईदूत्सूत्रस्थोऽपि कैयटः ‘कश्चिदेकदेशस्थ—’ इत्यादिभाष्यस्य दृष्टान्तवैषम्येण संज्ञासाधारण्यं न युज्यते वक्तुमिति संज्ञाशास्त्रं पक्षभेदेन भिन्नदेशस्थमेवेति बोधनाय प्रवृत्तः, ईदूत्सूत्रस्य संज्ञाशास्त्रत्वात् । यदपि ‘किं च व्यवहर्तृदृष्टान्ताश्रयणे ‘यथोद्देशं संज्ञापरिभाषम्’ इत्यनेन स्वदेशस्थत्वबोधनं व्यर्थम् । न च तेन तत्पक्षे तयोर्न स्वदेशस्थत्वं बोध्यते, किं तु स्वदेश एव स्वार्थबोधकत्वं तेन बोध्यते इति वाच्यम्, व्युत्पन्नस्य पुरुषस्य स्वदेशे पदपदार्थोपस्थितौ वाक्यार्थबोधे प्रतिबन्धकाभावेन तत्सिध्या तस्य तत्फलत्वासंभवात् । न च परिभाषादेश एवाकाङ्क्षया सर्वविधीनामुपस्थित्या तैरेकवाक्यतया लक्ष्यसंस्कारः, इत्येवमर्थे तात्पर्यग्राहकं तदिति वाच्यम्, तथा सति कार्याकाङ्क्षया परिभाषाणां कार्यदेशे उपस्थित्या लक्ष्यसंस्कार इत्येवं त्वदुक्तार्थककार्यकालं संज्ञापरिभाषमित्येतत्प्रतिद्वन्द्वीभूततया संज्ञापरिभाषेण काल्यते आक्षिप्यते इत्यर्थकं संज्ञापरिभाषकालं कार्यमित्येव पठितुं युक्तत्वेन ‘यथोद्देशं संज्ञापरिभाषाम्’ इति पाठस्य त्वदुत्प्रेक्षितार्थबोधकत्वेन तथा वचनपाठस्यासङ्गत्यापत्तेः । त्वन्मते आकाङ्क्षामूलकत्वेन न्यायस्य तुल्यतया पाठवैषम्ये बीजाभावात् । मम तु कार्यकालपदेन कार्यस्य काल एव कालो यस्य; कार्यं कालो यस्येति वा व्युत्पत्त्या कार्यदेशीयत्वस्यैव बोधनात्-

स्प्रातिद्वन्द्वितया तयोः पाठदेशीयस्थत्वबोधनाय तथा पाठ इति तत्सार्थक्यम, 'व्यवहर्तृदृष्टान्ताश्रयणे तु तदसंगतिः स्पष्टैव' इति प्रलपितं तदप्यसाधु, यथोद्देशपदेन सापादिकदेशाभिन्नदेशसंक्रमाभावार्थकत्वस्यैव सिद्धान्ते स्वीकारेण संज्ञापरिभाषकालं कार्यमिति पाठे तस्यार्थस्यालाभेन तथा पठितुमौचित्याभावात् । कार्यकालपदस्याकर्षणशक्तिमच्छास्त्रजन्याकाङ्क्षाप्रयोज्योपस्थितिविषयीभूतार्थकत्वस्यैवाभ्युपगमः । आकर्षणशक्तिमच्छास्त्रं च त्रैपादिकमेव भवति । तेषु 'पूर्वत्रासिद्धम्' इत्यनेनासिद्धत्वात्सापादिकगुणशास्त्राणामनुपस्थितौ अप्रामाण्यज्ञानानास्कन्दितलक्ष्यधर्मिकसाधुत्वप्रकारकज्ञानोपयोगिबोधजनकत्वासंभवेन तान्याकर्षन्त्येव स्वोपकारकाणि शास्त्राणीति आकर्षणस्यावश्यकत्वेऽपि कार्यकाले, यथोद्देशे आकर्षणस्यानावश्यकत्वेन संज्ञापरिभाषकालं कार्यमिति पाठस्यानादरणीयत्वात् । परिभाषादेश एवाकाङ्क्षया सर्वविधीनामुपस्थित्या तैरेकवाक्यतया लक्ष्यसंस्काराय नाश्रितो यथोद्देशः । आकाङ्क्षाभेदेन वैलक्षण्यस्याकिंचित्करत्वात्, किंतु सापादिकत्रैपादिकविध्युपकारकत्वभेदेनैव पक्षभेद इत्युपाध्यायगूढाभिसन्धिः । एवं च 'त्वन्मते आकांक्षामूलकत्वेन न्यायस्य तुल्यतया पाठवैषम्ये बीजाभावात्' इत्युक्तेर्दुराग्रहदूषणकलुषिताया दत्तजलाञ्जलितैव । व्यवहर्तृदृष्टान्तश्च कार्येण काल्यत इत्याशयेनैव स्वीकृतः इति न तस्यासाङ्गत्यम्, कार्यस्य काल एव कालो यस्य, कार्य कालो यस्येति वा, व्युत्पत्त्याश्रयणे प्रयोजनविशेषोद्देशेन कार्यप्रवृत्तिकाल एव प्रवृत्तिः स्यात्संज्ञापरिभाषाशास्त्राणाम् । तथा च त्रैपादिकाविधीनामसिद्धत्वे संज्ञापरिभाषाणां कथं वा सिध्यतु तत्सान्निध्यप्राप्तिः । कार्येण काल्यते इत्यर्थाश्रयेण तु अदृष्टपिशाचेन स्वादर्शिपुरुषाकर्षणवत्त्रैपादिकेन संज्ञापरिभाषाशास्त्राकर्षणं सूपपादम् । संज्ञाशास्त्रेषु परं कार्यकालपक्षे तदाश्रयणसामर्थ्येन विधिदेशस्थत्वमभ्युपगन्तव्यम्, अन्यथा यथोद्देशेनैव निर्वाहसंभवः 'अयादिभ्यः परैव प्रगृह्यसंज्ञा' इति भाष्यमप्यत्रैवार्थे प्रमाणं भवति । व्यवहर्तृदृष्टान्ताश्रयणं च परिभाषाशास्त्रेष्वेव न संज्ञाशास्त्रेषु, यतो व्यवहर्तारो न भवन्त्युपजीव्याः गामिकर्मदेशीयानां न तथा भवति संज्ञाशास्त्रं विधीनामुपजीव्यम्, परिभाषाशास्त्रं पुनर्नियामकमपि नोपजीव्यम्, विधिशास्त्राणां तत्प्रवृत्तिमन्तरापि शक्तिग्रहेण शाब्दबोधजननात्, कार्यकालपदे कार्येण काल्यत इति व्युत्पत्तिरे-

अत्र 'एकदेशस्थः' इत्यनेन तत्र तत्र तत्तद्बुद्धावपि तत्तद्देशस्थत्वं

कैव, संज्ञाविषये तद्देशस्थत्वं तु परिभाषारंभसामर्थ्यसिद्धम् । अतश्च 'संज्ञापरिभाषासाधारण्येन प्रतिपादिते कार्यकालपक्षे कार्यं कालो यस्येति व्युत्पत्त्या कालपदस्य देशपरत्वमङ्गीकृत्य संज्ञाविषये तद्देशस्थत्वम्, परिभाषाविषये तु नेति वैषम्ये बीजाभावादर्धजरतीयत्वापत्तेश्च' इत्यर्वाचीनान्तर्वाणेः सर्वमङ्गलाकर्तुरज्ञानविजृम्भणविप्रलब्धं प्रलपनमप्रामाण्यपट्टाभिषिक्तमिति स्पष्टमेव सुमेधसाम् । एवं चाङ्गाधिकारप्रतिनिर्देशपक्षाश्रयणपर 'क्ङिति च' इति सूत्रस्थेन भाष्येण परिभाषाणां कार्यकालपक्षे विधिदेशीयत्वस्यानङ्गीकारात्पठितदेशस्थत्वेन एकदेशस्थत्वात् 'कश्चिदेकशस्थः—' इति भाष्यं पक्षद्वयसाधारणमेवेति वक्तुं युज्यते इति भावः । अथ एकदेशस्थस्यापि परिभाषाशास्त्रस्य स्वविधेयविशेषणदलोपस्थितिद्वारा स्वघटकपदोपस्थितिद्वारा वा विधिदेशस्थत्वं युक्तं नापलपितुम् । अतश्च 'कश्चिदेकशस्थ' इति भाष्येण बोधितमेकदेशस्थत्वं नैव युज्यते परिभाषासु । किं च तत्तद्विधिप्रदेशे परिभाषाबुद्ध्या एकवाक्यतायां परिभाषाशास्त्राणां तत्तद्देशस्थत्वेन तस्मिन्निति तस्मादिति परिभाषयोः 'ङमो ह्रस्वादचि' इत्याद्येकवाक्यतायां उभयोरप्येकदेशस्थत्वेन परत्वव्याघातात् परत्वादित्याशयक 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति तस्मिन्, इति सूत्रस्थभाष्यासंगतिः । अपि च यथोद्देशे परिभाषादेशे विध्येकवाक्यतायां तद्देशस्थत्वेन पौर्वापर्यव्याघातात् रामेष्वित्यादौ चरितार्थस्य 'बहुवचने झल्येत्' इत्येत्वस्य रामेभ्य इत्यादौ प्रवृत्त्यनापत्तिः इत्यत आह— अत्रेति । 'षष्ठीस्थाने—' इति सूत्रभाष्ये इत्यर्थः ॥ एकदेशस्थ इत्यनेनेति । एकदेशस्थत्वव्यवहारेणेत्यर्थः ॥ तत्रेति । औपश्लेषिकाधिकरणबोधकसप्तम्यन्तादिघटिते इत्यर्थः ॥ तत्रेति । विधावित्यर्थः ॥ तत्तद्बुद्धावपीति । औपश्लेषिकाधिकरणबोधकसप्तम्यन्तादिघटितविध्युपकारकपरिभाषाशास्त्रविधेयविशेषणदलोपस्थितौ तद्विधेयतद्घटकपदोपस्थितावपि वेत्यर्थः ॥ तत्तद्देशस्थत्वमिति । परिभाषाशास्त्रोपकार्यविधिदेशस्थत्वभ्रममित्यर्थः । एकदेशस्थत्वं विधिदेशस्थत्वे दुरुपपादम्, अतः तद्विशेषणमसंभवदनर्थकं च भवति । ततस्तद्भाष्यं पक्षयोरुभयोरपि परिभाषाशास्त्राणां स्वदेशस्थत्वेन एकदेशस्थत्वमवगमयति । एकदेशस्थ-

त्वं च, भाष्यबोधितं पठितदेशस्थत्वरूपम्। अत एव ‘पठितदेशस्थत्वमेव सर्वथा बोधयितुमेकदेशस्थ इत्युक्तमिति’ ‘षष्ठी स्थानेयोगा’ इति सूत्रे उक्तमुद्योते ॥ पठितदेशस्थत्वं च, अष्टाध्यायीस्थानुपूर्वीघटकपौर्वापर्यव्यवहारप्रयोजकसन्निवेशघटकावकाश घटकत्वप्रकारकतात्पर्यविषयत्वम्। इत्थं चापठितानामप्यष्टाध्याय्यां ज्ञापकसिद्धानां ‘असिद्धं बहिरंगं—’ इत्यादीनां ‘वाह ऊठ’ इत्यादिसूत्रज्ञापितानां ज्ञापकसूत्रघटितसन्निवेशावकाशघटकत्वप्रकारकतात्पर्यविषयत्वं सूपपादम्। ततश्च तेषां षाष्ठत्वादिकमपि भवति सुवचम्। अतश्च निरुक्तपठितदेसस्थत्वमेव भवति तद्देशस्थत्वेप्रयोजकम्। ‘यद्येकं वाक्यं तच्चेदं च, किमर्थं नानादेशस्थं करोति? अन्यदपि किंचित्संगृहिष्यामीति। कौशलमात्रमेतदाचार्योदर्शयति, यदेकं वाक्यं नानादेशस्थं करोति’ इति ङ्याप्सूत्रस्थभाष्यप्रामाण्येन, ‘प्रधानसान्निधावुपदेशार्हाणां प्रकरणोत्कर्षणोपदेशः सर्वप्रधानसंबन्धार्थ’ इति कैयटेन च ‘यस्य येनार्थसंबन्धो दूरस्थेनापि तेनसः अर्थतो ह्यसमर्थानामानन्तर्यमकारणम् ॥’ इति न्यायेन च भिन्नदेशस्थयोरपि विधिपरिभाषयोराकाङ्क्षायोग्यतादिवशादङ्गाङ्गिभावग्रहे परिभाषाशास्त्रविधेयपदोपस्थितेरेव पक्षद्वये स्वीकारेण कार्यार्थत्वेऽपि परिभाषाणां तत्तत्कार्यदेशे तत्तत्पाठस्यानावश्यकत्वेन च सर्वप्रकरणशेषत्वग्रहेऽपि भिन्नदेशस्थानां कार्यकाले विधिघटितसन्निवेशावकाशघटकत्वप्रकारकतात्पर्यविषयत्वाभावः सूपपादः। एवं यथोद्देशे विधीनां गुणघटितसंनिवेशावकाशघटकत्वप्रकारकतात्पर्यविषयत्वाभावोऽपि सुवचः। न हि ‘यदेकं वाक्यं नानादेशस्थं करोति’ इति ङ्याप्सूत्रस्थभाष्यविरोधः; नानादेशस्थानामपि एकवाक्यत्वमित्येव भाष्येण बोधनात्।

घटादिरेकदेशस्थः स्मृत्या नान्यत्र नीयते।
अचेतनस्य शास्त्रस्य नान्यदेशगतिस्तथा ॥

एवं च “एतेन ‘नह्यचेतनस्य शास्त्रस्य स्वदेशं विहायान्यदेशगमनं संभवति, नाप्यस्मदादिबुद्धिजननेन स्वदेशत्यागो भवति’ इत्यपास्तम्” इति सर्वमङ्गलाकारोक्तिरज्ञानविजृम्भितैवेति विदां कुर्वन्तु विद्वांसः ॥ ननु ‘षष्ठी स्थाने—’ इति सूत्रस्थभाष्यबोधितमेकदेशस्थत्वं न समीचीनम्, परिभाषा-

वारयति । यथा व्यवहर्तॄणां कार्यार्थमनेकदेशगमनेऽपि न तद्देशीयत्वव्यवहारः किं त्वभिजनदेशीयत्वव्यवहार एव, तद्वत् । निषेधवाक्यानामपि निषेध्यविशेषाकाङ्क्षत्वाद्विध्येकवाक्यतयैवान्वय इति परिभाषासादृश्या-

---

शास्त्रविधेयपदोपस्थितिः खल्वङ्गीकृता भवति, तत्र विशेषणदलोपस्थितौ विशेषणदलस्यार्थसिद्धस्य परिभाषाशास्त्राघटकत्वं तावद्दुरपलपम्, तथैव विध्येकवाक्यतापन्नत्वे विधिदेशत्वमपि । एवं इकः इत्यादि पदं परिभाषाशास्त्रविधेयं तद्घटकमपि विध्येकवाक्यतापन्नत्वे विधिघटकमपि भवतीति विधिदेशस्थत्वेन विधिदेशीयत्वं नैव शक्यते निह्नोतुमित्यत आह— **यथेति** । **तद्देशीयत्वव्यवहार इति** स्वकार्यसंपत्त्यनुकूलगामिकर्मीभूतदेशीयत्वव्यवहार इत्यर्थः । अभि **अभिजनदेशीयत्वव्यवहार इति** । अत्र अभिजायते एभ्य इति व्युत्पत्त्या अभिजन शब्दस्य पूर्वबान्धवः पित्रादिरर्थ इति तत्प्रयोगस्वारस्येन परिभाषाविधेयपदमेव व्यवहर्तृस्थानीयमभिप्रेतमितिध्वनितम् । ततश्च परिभाषाविधेयपदोपस्थितिरेव उपाध्यायसम्मता न तु परिभाषोपस्थितिरिति स्पष्टमेव विज्ञायते । अत्राभिजनस्थानीयं परिभाषाशास्त्रं अभिजनदेशस्थानीयः परिभाषोपदेशदेश इति विवेकः ॥ परिभाषाशास्त्रविधेयपदस्य नानादेशेष्वाकस्मिकोपस्थितिविषयत्वेऽपि यथा वा एकदेशस्थत्वप्रतिपत्तिर्यथोद्देशे, तथैव कार्यकालेऽपि परिभाषाविधेयपदस्यानेकविध्येकवाक्यतापन्नत्वे अनेकविधिघटकत्वेनानेकविधिदेशीयत्वाश्रयणे गौरवेण लाघवादेकपरिभाषादेशीयत्वमेवाभ्युपगन्तव्यम् । अर्थासिद्धमपि विशेषणदलं तत्पदजन्यप्रतीतिविषयत्वेन कार्यकारणयोरभेदाध्यवसायात् तत्पदमिव तदर्थसिद्धमपि तद्घटकम्, न तु विधिघटकम्; व्यवहर्तृन्यायादिति भावः ॥ ननु आर्थिकनिषेधपरविशेषणदलोपस्थितौ वाक्यार्थैकवाक्यतया समर्थितमेकदेशस्थत्वं पक्षद्वयेऽप्यसङ्गतम्, पक्षद्वयस्य संज्ञापरिभाषामात्रविषयकत्वे परिभाषाबोधिते 'क्ङिति च' इति सूत्रस्य कार्यकालपक्षाश्रयणपरं भाष्यं चासंगतमित्यत आह— **निषेधवाक्यानामिति** । निषेधसमर्पकाणां विधिशास्त्रार्थसंग्राहकाणांक्ङिति परे इको गुणो न स्यात् इत्यादिवाक्यानामित्यर्थः ॥ **निषेध्यविशेषाकाङ्क्षत्वादिति** । निषेध्या गुणवृद्ध्यादयः, तेषां ये विशेषाः विधिविशेषाः 'सार्वधातुकार्धधातुकयोः' इत्यादयः, तेषामाकाङ्क्षा

SGDF
Sri Gangeshwari Digital Foundation

साऽस्तीत्यर्श आद्यच् । तस्य भावः । निषेध्यशास्त्राकाङ्क्षोत्थापितनिषेधशास्त्रा-
काङ्क्षया इत्यर्थः । एवं निषेध्यविशेषणाकाङ्क्ष्यते इति व्युत्पत्त्या निषेध्यशा-
स्त्राकाङ्क्षोत्थापितनिषेधशास्त्रकाङ्क्षया इत्यर्थः । अनेन यथोद्देशकार्यकालौ सू-
चितौ । **विध्येकवाक्यतयैवान्वय** इति ‘अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्वि-
भागे स्यात्’ इति जैमनीयसिद्धान्तानुरोधेन भिन्नवाक्यतया पठिताभ्यां
गुणप्रधानशास्त्राभ्यां एकस्यैव प्रधानीभूतस्य विधेयस्य समर्पणमिति विधे-
यसमर्पकत्वादेकवाक्यता, यथा यजतिषु ये यजामहं करोति नानूयाजे-
ष्वित्यत्र यद्यपि नञ् प्रसज्यप्रतिषेधार्थकः करोतिनासंबध्यते नानूयाजप-
देन; प्रधानान्वयलाभे संभवति अप्रधानान्वयस्यान्याय्यत्वात्, करोत्यर्थ-
स्यैव प्राधान्येन तत्रैवान्वयौचित्यात्, ‘यजतिषु ये-यजामहं करोतीति
अनुयाजेषु सामान्यतः प्राप्तस्य ये-यजामहकरणस्य नानुयाजेष्विति निषेधे-
ऽपि तदंशे तद्वाक्यं नाप्रमाणं भवितुमर्हति विकल्पाङ्गीकारेण उभयप्रामाण्य-
स्याक्षतत्वात्, तथापि नञ् अनुयाजपदेनैवान्वेतीति पर्युदासार्थक एव स्वी-
कार्यः; विकल्पस्याष्टदोषदुष्टत्वेनान्याय्यत्वात् । परस्परविरुद्धयो र्विधिनिषे-
धयोः समुच्चयस्य असंभवान्नानूयाजभिन्नेषु यजतिषु इति वाक्यार्थेन प्रामा-
ण्यमक्षतम्, तथा विधिनिषेधयोरुभयोरपि शास्त्रत्वाविशेषात् प्रबलदुर्बलभाव-
स्यानौचित्येन निषेधविषयेऽपि पाक्षिकीग्रहणाग्रहणयोरिव प्रवृत्तिर्दुर्वारा स्यात्;
अतो निषेधवाक्येषु पर्युदासमाश्रित्य निषेधशास्त्राणां आर्थिकनिषेधपरविशेषण-
दलनिवेशे तात्पर्यं कल्पयित्वा विधिवाक्यार्थः परिष्करणीयः । ततश्च ‘सार्व-
धातुकार्धधातुकयोः’ इत्यादौ क्ङिद्भिन्नमित्यार्थिकनिषेधपरविशेषणदलनिवेशे
‘क्ङिति च’ इत्यादीनां तात्पर्यं परिकल्प्य क्ङिद्भिन्नयोः सार्वधातुकयोरित्या-
दि विधिवाक्यार्थः परिष्क्रियते । तथा च विधिभिः वाक्यार्थैकवाक्यतापन्नत्वं
निषेधशास्त्राणामिति विध्येकवाक्यतापन्नत्वस्य परिभाषाशास्त्रवृत्तिधर्मस्य निषेध-
शास्त्रेषु दर्शनेन ‘ताद्धर्म्यात्ताच्छब्द्यम्’ इति न्यायात्परिभाषात्वेन व्यवहारो भा-
ष्ये । निषेधशास्त्रीयविशेषणदलनिवेशेन वाक्यार्थैकवाक्यतया संभवतः परिभाषा-
म्भात्पूर्वं जातस्य विधिवाक्यार्थग्रहस्य निषेधशास्त्रदर्शनेन बाधकमस्तीतिसंभाव-
नया तत् ज्ञानं प्रमा नवेति सन्देहेन आसन्दिग्धानाहार्याप्रामाण्यज्ञानानास्क-
न्दितलक्ष्यधर्मिकसाधुत्वप्रकारकज्ञानोपयोगिबोधजनकत्वरूपशास्त्रत्वासंपत्त्यावि-

ष्याकाङ्क्षोत्थापितया निषेधशास्त्राकाङ्क्षया निषेधशास्त्रविधेयार्थिकानिषेधपरविशेषणदलोपस्थित्या विधिवाक्यार्थपरिष्कारे निषेधशास्त्रस्य कार्यकालपक्षाश्रयणपरं भाष्यमपि समञ्जसम् , परिभाषासादृश्यात्परिभाषात्वेन 'क्ङिति च' इत्यस्य कार्यकालपक्षाश्रयणं युक्तमेव, परिभाषासादृश्यं निषेधशास्त्रस्य चेत् निषेधसादृश्यं च परिभाषाशास्त्रस्य सिध्यति । सादृश्यं चेत्थं बोद्धव्यम् , 'क्ङिति च' इत्यादौ विध्येकवाक्यत्वाभावेवाक्यभेदो दोषः, विधिनिषेधयोरेकविषयत्वेन विकल्पश्चापद्येत, तत्परिहाराय निषेधवाक्यार्थबोधस्य विधिविधेयकार्यस्यार्थिकनिषेधपरविशेषणविशेष्यान्यतरदलनिवेशपरत्वस्याङ्गीकारात् क्ङिद्भिन्नयोः सार्वधातुकयोरिगन्तस्याङ्गस्य गुणः स्यादिति विधिवाक्यार्थबोधः संपद्यते, एतादृशपरिष्कारात्पूर्वं 'सार्वधातुकार्धधातुकयोः' इति गुणस्य क्ङिति प्रसक्तस्य परिष्कारेणाभावः सिध्यति । स चार्थादेव, न शब्दतः । यदि शब्दतो निषेधोङ्गीक्रियते तर्हि पुनर्विकल्पापत्तिर्दुर्वारा । क्ङिद्भिन्न इत्यनेन शब्दतो निषेधाप्रतीतेः । तथा परिभाषायामपि प्रथमतो वाक्यार्थबोधे जाते विधिवाक्यार्थः आर्थिकनिषेधपरपदार्थोपस्थित्या परिष्क्रियते तदित्थम्, 'तस्मिन्नितिनिर्दिष्टे पूर्वस्य' इत्यादि परिभाषावाक्यार्थबोधजातवाक्यभेदादिपरिहाराय 'इको यणचि' इत्यत्रार्थिकनिषेधपरपरस्मिन्निति विशेषणदलोपस्थितिर्भवति । ततश्च इकः स्थाने यणभवति अचि परे इति विधिवाक्यार्थः परिष्क्रियते तादृशदलनिवेशात्प्राक् व्यवहिते चाचि प्रसक्तस्य यणः आर्थिकनिषेधपरपरिष्कारः संपद्यत इति पक्षद्वयेऽपि परिभाषाणां स्वदेशे वाक्यार्थबोधो जायते । तस्य च पूर्वोक्तदलनिवेशे तात्पर्यं कल्पयित्वा पदोपस्थितिर्विधीयते, तादृशपदोपस्थित्या विधिवाक्यार्थपरिष्कार इति निषेध्यनिषेधयोरिव विधिगुणयोरपि वाक्यार्थैकवाक्यता युक्तैवेति तदङ्गीकारेण समर्थितमेकदेशस्थत्वं परिभाषासु पक्षद्वयेऽप्यव्याहतम् । न च 'निषेधाश्च बलीयांसः' इति न्यायेन निषेधस्य प्राबल्यबोधनान्न विकल्पापत्तिरिति शङ्क्यम् ; नञ्घटितवाक्येषु द्वयी गतिराश्रिता, प्रसज्यप्रतिषेधः पर्युदासश्चेति, पर्युदासेन विध्येकवाक्यत्वे नैव विकल्पप्रसक्तिः । तत्र निषेधस्य प्रतियोग्युपजीवनाभावात् । यथा— 'नानूयाजेषु' इत्यादौ । प्रसज्यप्रतिषेधेन विधिवाक्यभेदे निषेधस्य प्रतियोग्युपजीवनेनात्यन्तिकोपजीव्यविरोधस्यान्याय्यत्वेन पाक्षिकोप-

जीव्यविरोधः। यथा— 'नतौ पशौ करोति' इत्यादौ। तत्र प्रसज्यप्रतिषेधाश्रयणे वाक्यभेदः प्राप्तबाधश्च। पर्युदासे तु, एकवाक्यता प्राप्ताबाधश्च। शास्त्रे त्वस्मिन् पुनः 'वेः स्कन्देरनिष्ठायाम्' इति पर्युदासलभ्यार्थिकनिषेधेऽपि शास्त्रीयकार्यबोधनात्प्राप्तबाधस्यावश्यकतया 'नासिकोदर—' इत्यत्रोष्ठादिग्रहणस्य मध्येऽपवादन्यायेन असंयोगोपधादिति आर्थिकनिषेधबाधकथनं संगच्छते। तथा च पर्युदासेऽपि निषेधपर्यवसानेन प्रतियोग्युपजीव्यविरोधस्य पाक्षिकत्वसंभवेन विकल्पोऽत्र दुर्वारः। निषेधस्य बलीयस्त्वं च धर्मिग्राहकमानेन स्वोपजीव्यभूतस्यान्तरङ्गत्वसंभव एव एतेन 'क्ङिति च' इति सूत्रस्थकैयटस्यायमाशयः— 'निषेधाश्च बलीयांसः' इति न्यायेन गुणभूतस्यापि तस्य बलवत्त्वात् विधिवाक्यार्थबोधं विना बोधासंभवात् ईदृशे विषये भिन्नवाक्यतायाः यथोद्देशपक्षेऽप्यावश्यकत्वेन गुणदेशेऽपि प्रधानस्योपस्थितिरङ्गीकर्तव्येति सर्वमङ्गलोक्तमपास्तम्; उक्तरीत्या तस्य न्यायस्याप्रवृत्तेः। न हि 'क्ङिति च' इति प्रतिषेधोऽन्तरङ्गः, निषेध्यशास्त्रनिमित्ततावच्छेदकाक्रान्तेष्वेव लक्ष्येषु प्रतिषेधशास्त्रविषयता, अतश्च निषेधशास्त्रस्यापि निषेध्यनिमित्तनिमित्तकत्वमित्येवावश्यमाश्रयणीयम्, अतश्चान्तरङ्गबहिरङ्गभावो दुर्निरूप एवेत्यदोषात्। न चैवं 'अनचि च' इत्यादौ पर्युदासाश्रयणे अज्भिन्ने अच्सदृशे हलीत्यर्थे अवसाने द्वित्वानापत्तिः। हलीति वक्तव्ये अनचीति गुरुनिर्देशकरणेन विधिनिषेधयोरेकसूत्रविधेयत्वे वा असमर्थसमासादिदुष्टोऽपि लक्ष्यानुरोधात्क्वचित्प्रसज्यप्रतिषेधः स्वीकार्य इति बोधनेन दोषाभावः। अत एव 'रोऽसुपि' इत्यादौ प्रसज्यप्रतिषेधः सिद्धः, विकल्पस्य तु न प्रसक्तिः 'निषेधांश्च बलीयांसः इति न्यायेन तद्बाधात्। न च तस्यापि न्यायस्यान्तरङ्गबहिरङ्गभाव एव प्रवृत्तिरङ्गीकृतेति दुरुद्धरोदोषः; अनचीत्यादीनां बहिरङ्गत्वं अपरनिमित्तकत्वेनान्तरङ्गत्वाक्रान्तस्य तत्र विधेर्निषेधोपजीव्यत्वं चेति अन्तरङ्गादुपजीव्यादपि अचि न भवतीत्यादिनिषेधस्य बहिरङ्गत्वेन बलीयस्त्वध्रौव्यात् ॥ ननु निषेधसादृश्यात्परिभाषाशास्त्रेषु आर्थिकनिषेधपरविशेषणदलं परिकल्प्य निषेध्य निषेधयोरिव विधिपरिभाषयोरपि वाक्यार्थैकवाक्यता स्वत्वङ्गीकृता, तन्न संगच्छते, भूतले घटो न इत्यतो भूतलभिन्ने घट इति बोधाभावात् प्रथमान्ताभिन्नसमभिव्याहृतनञो भेदबोधकत्वाभावेन पर्युदासार्थकत्वा-

त्परिभाषात्वेन व्यवहारः 'क्ङिति च' इत्यत्र भाष्ये। तत्र एकवाक्यता पर्युदासन्यायेन। प्रसज्यप्रतिषेधेऽपि तेन सहवाक्यार्थबोधमात्रेण एकवाक्यताव्यवहारः ॥

भावान्निषेध्यनिषेधयोरपि तदसम्भव इति तत्सादृश्याद्विधिपरिभाषयोस्तत्कल्पनमनुचितमित्यत आह--- तत्रेति। तयोरित्यर्थः, विधिनिषेधयोरिति यावत् ॥ एकवाक्यतेति। वाक्यार्थैकवाक्यतेत्यर्थः ॥ पर्युदासन्यायेनेति। 'निपात एकाजनाङ्', इत्यादौ असमर्थसमासवाक्यभेदविकल्पाभावरूपलाघवदर्शनेन आङ्भिन्नपरत्वमित्येवं लाघवयुक्तिरूपो न्यायस्तेनेत्यर्थः। न चैवं 'एकाजनाङिति नासूत्रि' इति सन्धिशेखरविरोधः, अनचीति ज्ञापितस्यार्थस्यानाश्रयणे तदुपन्यासात्, 'वाक्यभेदादिभियैव तथा न सूत्रितम्' इति तद्ग्रन्थेन प्रसज्यप्रतिषेधे यो वाक्यभेदादिर्दोषः पर्युदासाश्रयणेन स परिहरणीय इति बोधनेन पर्युदासे लाघवस्यैवानुगृहीतत्वात् 'अनचि च' इत्यादौ प्रसज्यप्रतिषेध इति त्वन्यदेतत् ॥ ननु 'न धातुलोप---' इत्यादावसमस्तनञः क्रियायामेवान्वयदर्शनेन प्रसज्यप्रतिषेध एव युक्तः, 'क्क्ङिति च' इति सूत्रे न धातुलोपसूत्रान्नञोऽनुवृत्तौ न पर्युदासप्रसक्तिः क्रिययैव नञोऽन्वयात्। तथा च 'सार्वधातुकार्धधातुकयोः' इत्यादौ क्ङिति नेत्यस्योपस्थितौ विधिदेशीयत्वमेव भवेदिति कार्यकाले एकदेशस्थत्वं भाष्याननुगृहीतं स्यात् इत्यत आह--- प्रसज्यप्रतिषेधेऽपीति। तेनेति। विधिशास्त्रेणेत्यर्थः। सहवाक्यार्थबोधमात्रेणेति। मात्रपदेन वाक्यैकवाक्यतायामव्यवहितोत्तरकालोत्पत्तिकवाक्यार्थबोधस्य जरन्मीमांसकैरङ्गीकृतस्य निषेधसमर्पकाणां विरुद्धलक्षणया तद्भिन्नपरत्वस्य नञस्तात्पर्यग्राहकत्वस्य च व्यवच्छेदः। विधिनिषेधयोरेकवाक्यत्वाभावे शास्त्रद्वयप्रामाण्यसिद्धये उभयोरपि शास्त्रत्वाविशेषेण प्राबल्यदौर्बल्यस्य दुरुपपादतया 'अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णाति' इति ग्रहणाग्रहणयोरिव विकल्पो दुर्वारः स्यात्, इति तयोरेकवाक्यता अवश्यमङ्गीकर्तव्या, एकबोधीयविषयतासमर्पकत्वरूपायास्तस्या मुख्यत्वं चाभ्युपेयम्, अतश्च प्रसज्यप्रतिषेधाश्रयणेऽपि क्क्ङिति परे गुणो न स्यादिति निषेधशास्त्रस्य प्रथमतो वाक्यार्थबोधे जाते वाक्यभेदविकल्पपरिहारायार्थिकनिषेधपरक्क्ङिद्भिन्नयोरित्यादिदलनिवेशे निषे-

SGDF
Sri Gurgeshwari Digital Foundation

षशास्त्राणां तात्पर्यं परिकल्प्य स्वोपस्थाप्यार्थनिष्ठविषयतानिरूपितविषयताप्रयोजकपदघटितत्वरूपया वाक्यार्थैकवाक्यतया निषेध्यविधिवाक्यार्थपरिष्कारः, क्क्ङिद्भिन्नमिति पदस्य चार्थिकनिषेधपरस्य निषेधशास्त्रबललभ्यस्य 'प्रति प्रधानं गुण आवर्तते, इति न्यायेनावृत्तिः, इत्यङ्गीकरणीयम्। अत एव 'क्क्ङिति प्रतिषेधे तन्निमित्तग्रहणम्' इति वार्तिकप्रत्याख्यानसङ्गतिः, अन्यथा क्क्ङिति चेत्यस्य चितमित्यादौ निषेधबोधने सार्थक्यात् च्छिन्नमित्यादौ व्यवहितेऽपि गुणनिषेधासिद्धये तन्निमित्त ग्रहणस्य वक्तव्यत्वे, फलभेदे प्रत्याख्यानायोगात्तद्वार्तिकप्रत्याख्यानपरभाष्यासंगतिः। मम तु 'पुगन्त—' इति सूत्रे, क्क्ङिद्भिन्नमिति विशेषणदलनिवेशन छिन्नमित्यादौ निषेधः सिध्यतीति तदर्थं नारम्भणीयं भवति वार्तिकम्। न हि क्क्ङितीत्यस्योपस्थितौ छिन्नमित्यादौ व्यवहिते गुणनिषेधः सिध्यति, अङ्गाङ्गिभावसंपादनाय प्रथमतो जायमानेन वाक्यार्थबोधेनाङ्गस्य पुगन्तत्वसहचरितलघूपधत्वविविशेषणसामर्थ्यात् 'पुगन्त—' इति सूत्रेण व्यवहित एव गुणविधिदर्शने 'क्क्ङिति च' इत्यनेन 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परिभाषाविधेयपदैकवाक्यतापन्नेन क्क्ङित्प्रत्ययाव्यवहितपूर्ववृत्तित्वविशिष्टस्यैवेको गुण निषेध बोधनमिति 'क्क्ङिति च' इत्यस्य 'पुगन्त—' इत्येतदङ्गत्वग्रहाभावो दुर्वारः, अतश्च क्क्ङिद्भिन्नपदोपस्थितिरेवावश्याश्रयणीया भवति, क्क्ङितीत्युपस्थितौ दोषध्रौव्यात्। न च क्क्ङिद्भिन्नपदोपस्थितेः पूर्वमङ्गाङ्गिभावग्रहायावान्तरवाक्यार्थबोधे अव्यवहिते एव गुणनिषेधप्रसक्तिरिति अङ्गाङ्गिभावग्रहाभावो दुष्परिहरः, औपश्लेषिकाधिकरणबोधकसप्तम्यन्तं यत्र प्रत्ययबोधकं पदं श्रूयते तत्र इको गुणः क्क्ङिति न, इत्यर्थेन 'पुगन्त—' इत्यत्र 'सार्वधातुकार्धधातुकयोरिति पदमौपश्लेषिकाधिकरणबोधकसप्तम्यन्तमेवेति तच्छ्रवणेन तयोरङ्गाङ्गिभावस्य सुवचत्वात्। न चैवं क्क्ङिति न, इत्येवोपतिष्ठतां न तु क्क्ङिद्भिन्नयोः, इति शङ्क्यम्, क्क्ङिति न, इत्युपस्थितौ वाक्यैकवाक्यतैव स्यात्, अतश्च क्क्ङिदव्यवहितपूर्ववृत्तित्वविशिष्टस्य गुणनिषेधो भवेदित्यङ्गाङ्गिभावो दुरुपपादः, क्क्ङिद्भिन्नयोः, इत्युपस्थितौ तु 'गुणः कृतात्मसंस्कारः' इति न्यायेन क्क्ङिद्भिन्नयोरिति विशेषणमनुभूयैव सार्वधातुकार्धधातुकयोरिति पदमङ्गेऽन्वेति, अङ्गं तु पुनः पुगन्तत्वेन लघूपधत्वेन च विशेषितं भवति, अतश्च

तत्सामर्थ्यादङ्गावयवस्यैवेको गुणनिषेध इति अङ्गाङ्गिभावः सूपपादः । अत एव ‘येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् तेन भिनत्तीत्यादौ अनेकव्यवहितस्य इको न गुणः’ इति ‘पुगन्तलघूपधस्य च’ इति सूत्रस्थकौमुदीग्रन्थः सङ्गच्छते । तत्र हि द्वेष्टीत्यादावङ्गावयवस्येकः तदुपरितनेन हला व्यवधानात् सार्वधातुकादिपरत्वाभावे कथं तत्र इको गुण इत्याशङ्कायां लघूपधस्येको गुणो विधीयते, उपधात्वं चान्त्यादलः पूर्वस्यैव भवति, ततश्च इक उपरितनस्यान्त्यस्य वर्णस्याभावे इकः उपधात्वाभावाल्लघूपधस्याङ्गस्य गुणविधानं निर्विषयमेव स्यात्, सूत्रारम्भसामर्थ्यात् एकवर्णव्यवधानं सोढव्यमेवेत्याशयकतया तत्रत्यो ग्रन्थः प्रवृत्तः । न चैवं ‘सार्वधातुकादिकमिको विशेषणं न त्वङ्गस्य’ इति तिङन्तमनोरमाग्रन्थविरोधः तदवस्थ एवेति वाच्यम्, ‘इको गुणवृद्धी’ इति सूत्रे भाष्ये तु पुक्यन्तो लध्वी उपधा तयोः समाहारद्वन्द्व इत्याश्रितम्, सार्वधातुकादिकं चाङ्गविशेषणं तत्रैवोत्थिताकाङ्क्षत्वात्, तत्पराङ्गावयवपुगन्तलघूपधरूपेको गुण इत्यर्थ इति तदाशयः’ इति तिङन्तशेखरेणैव मनोरमोक्तेर्व्याहतत्वबोधनात् । न चैवं छिन्नमित्यादौ क्तप्रत्यये कित्वसामर्थ्याद्व्यवहितस्यापिनिषेधः कल्प्यते, अतएव स्त्रीप्रत्ययशेखरे ‘इदं कित्वं स्तुयादित्यादावनिग्लक्षणवृद्धिनिषेधार्थम्’ इत्याशङ्कितमिति वाच्यं, उक्तं इष्टं इत्यादौ संप्रसारणाद्यर्थत्वेन कित्वस्य चारितार्थ्यात् । न चैवमेकवाक्यतायामङ्गाङ्गिभावग्रहः अङ्गाङ्गिभावग्रहे चैकवाक्यतेतीतरेतराश्रयः । अङ्गाङ्गिभावग्रहेण वाक्यार्थैकवाक्यतायामनन्तरमङ्गाङ्गिभावग्रहो न परिहीयते, वाक्यैकवाक्यतायां तु अनन्तरमङ्गाङ्गिभावग्रहो दुरुपपादो भवति, अतश्च ‘निमित्तापाये नैमित्तिकस्याप्यपायः’ इति न्यायेनैकवाक्यतैव भवति दुर्वचा, एवं चाङ्गाङ्गिभावग्रहो वाक्यैकवाक्यतायां न साधनं भवति, वाक्यार्थैकवाक्यतायां त्वङ्गाङ्गिभावग्रहः साधनमेव भवति । अङ्गाङ्गिभावसमर्थनेऽपि अन्योन्याश्रयाभावात् । न चैवं क्नोः कित्वेन एकवर्णव्यवधानेऽपि निषेधः प्रवर्तत इति ज्ञाप्यतामिति शङ्क्यम्, भवत इत्यादावकारव्यवधानेऽपि गुणनिषेधापत्तेः । निषेधस्य बहिरङ्गतया सिद्धत्वं तु, निषेधशास्त्रस्य निषेध्यशास्त्रनिमित्तकत्वेन बाधितम् । न च हल्वर्णव्यवधान एव निषेधप्रवृत्तिज्ञापनमिति न दोषः, अक्षैष्टामित्यादौ सकारेण

SGDF

व्यवधाने वृद्धिनिषेधापत्तेः । न चैवं ज्ञापकसाजात्येन धात्ववयवहल्वर्णव्यवधाने निषेधप्रवृत्तिर्ज्ञाप्यत इति शङ्क्यम्, गुतेत्यादौ दोषापत्तेः । ननु ज्ञापकसाजात्येन गुणनिषेधस्यैव व्यवधाने प्रवृत्तिरङ्गीक्रियते इति चेत्; नैवम्; मृष्ट इत्यादौ वृद्धिनिषेधानापत्तेः । न च हलन्ताच्चेति ज्ञापकम्, तद्धि बिभित्सतीत्यादौ गुणनिषेधार्थम्, यदि व्यवधाने निषेधो न प्रवर्तते तर्हि तत्स्याद्व्यर्थमिति शङ्क्यम्, धिप्सतीत्यादौ नलोपार्थत्वेन चारितार्थ्यात् । न हि 'ढ्रलोप—' इति सूत्रस्थमण्ग्रहणमपि ज्ञापकं भवितुमर्हति, 'क्ङिति च' इति निषेधाभावेऽपि अण्ग्रहणसामर्थ्यात् 'उरण् रपर' इति परिभाषाप्रवृत्त्यभावस्य गुणप्रवृत्त्यभावस्य वा रेफव्यवधानेऽपि तर्ढेत्यादावकरदीर्घस्य वा विनिगमनाविरहेण कल्पनीयत्वात् । 'उश्च' इति कित्वविधानमपि न ज्ञापकम्, अकृषातामित्यादौ सिजव्यवहितपूर्ववृत्तित्वविशिष्टस्येको गुणनिषेधबोधनेन सार्थक्यात् । ननु 'क्ङिति च' इति सति सप्तमी, तत्र ज्ञाप्यज्ञापकभावः सप्तम्यर्थः, ततश्च क्ङित्सत्ताज्ञाप्यो गुणवृद्ध्यभावः; इति वाच्यार्थे ज्ञाप्यत्वस्य ज्ञानजन्यज्ञानविषयतारूपत्वेन जनकज्ञानविषयस्य जन्यज्ञानविषयापेक्षया सिद्धताया निर्विवादत्वेन सिद्धसाध्यसमभिव्याहारन्यायात् 'राहूपरागे स्नायात्' इत्यादौ स्नानादीनां राहूपरागादिनिमित्तत्ववद्गुणवृद्ध्यभावस्य क्ङिन्निमित्तत्वं फलविधया भासते, इति छिन्नं भिन्नमित्यादौ गुणनिषेधः सिध्यत्येवेति चेत्; न, संभवत्यां परसप्तम्यां 'यस्य च—' इति सप्तम्या असंभवात्, उपपदविभक्तेरिति न्यायात्, सिद्धसाध्यसमभिव्याहारन्यायस्य तस्मिन्नित्यनेन बाधाच्च, भवनक्रियातदभावयोरमूर्तत्वेन क्ङित्परत्वासंभवाच्च, अवसानस्येव तदुपपत्तिकल्पने भवतः, अक्षैष्टा, इत्यादौ 'तद्भावभाविता' मात्रेण निमित्तत्वमादाय गुणवृद्धिनिषेधापत्तेश्च । अत एव 'वार्त्तिककृता तु तन्निमित्तग्रहणं कर्तव्यमित्युक्तम्, भाष्यकृता क्नोः कित्वेन ज्ञापकेन प्रत्याख्यातं, गुणवृद्धिविशेषणत्वेऽपि क्ङिति अव्यवहिते उपश्लिष्टस्य पूर्वस्य ये प्राप्नुत इत्यर्थस्य संभवेन परिभाषाया दुर्वारत्वात्, 'अनुवादे परिभाषा न' इति तु 'इको गुणवृद्धी' 'अचश्च' इति सूत्रद्वयमेवेत्युक्तं भाष्ये, तस्य निषेधस्यानुपलम्भाच्चाधिकरणसप्तमीसंभवे 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति न्यायेन 'यस्य च भावेन—' इति सप्तमी युक्तेत्यप्युक्तम्, सिद्धसाध्य—' इति न्यायस्य परिभाषया बाध एवो[illegible]

तः, तन्निमित्तग्रहणेन सामर्थ्यात् ज्ञापकेन परिभाषाबाध इति सूचितम्’ इत्युक्तं तिङन्तशेखरे । एवं ‘परे तु क्ङितीत्येतत् गुणवृद्धिविशेषणमेव, भवनक्रिया तद्भावयोरमूर्तत्वेन क्ङित्परत्वासंभवात्, इक इत्यस्याद्याप्यनुवृत्त्यनुक्तेः, अनुवृत्तावपि तस्य शब्दपरत्वात्, तस्मान्निमित्तग्रहणाभावे क्ङितीति सप्तम्या ‘तस्मिन्निति निर्दिष्टे पूर्वस्य’ इत्युपस्थित्या क्ङिति अव्यवहिते पूर्वस्य ये गुणवृद्धी प्राप्नुतस्तेनेत्यर्थः, ‘अनुवादे परिभाषा नोपतिष्ठते’ इति तु ‘इको गुणवृद्धी’ ‘अचश्च’ इति सूत्रद्वयविषयमेवेत्युक्तं भाष्ये, तस्य निषेधस्यानुपलम्भाच्च, तद्वक्ष्यति भाष्ये ‘क्ङित्यनन्तरो गुणभाव्यस्ति’ इति, निमित्तग्रहणे तु तत्सामर्थ्यात्परिभाषानुपस्थानम्, तत्प्रत्याख्याने तु लिङ्गादिना तदनुपस्थानम्, सम्भवन्त्यां परसप्तम्यां ‘यस्य च—’ इति सप्तम्या असंभवाच्च, उपपदविभक्तेरिति न्यायात्, सिद्धसाध्यसमभिव्याहारन्यायस्यापि तस्मिन्नितिशास्त्रेण बाध एव, अत एव निमित्तग्रहणप्रयोजनावसरे हत इत्युदाहरिष्यति, कैयटोक्तरीत्या इक्पदानुवृत्तावेव निमित्तग्रहणमिति वार्त्तिकस्योक्तिसंभवेन तत्प्रयोजनदानानुक्तिसंभवः स्पष्ट एवेत्याहुः, इत्युक्तमुद्योते ‘क्ङिति च’ इति सूत्रे । तथा च ‘क्ङिति च’ इति निषेधशास्त्रस्य विधिशास्त्रेण वाक्यार्थैकवाक्यतैवावश्यमङ्गीकर्तव्या, अन्यथा शब्दतो निषेधे विकल्पो दुर्वारः स्यात् । अत एव ‘क्ङिति च’ इति सूत्रे उद्योते ‘प्रसज्यप्रतिषेधेन वाक्यार्थबोधे तदंशे सामान्यशास्त्रजज्ञानस्याप्रामाण्यं कल्प्यते, इत्युक्तम्, तत्राप्रामाण्यपरिहाराय प्रकल्प्य—’ इति न्यायेनापवादविषयपरिहारेणैव उत्सर्गशास्त्रप्रवृत्तिरित्यङ्गीकारोऽपि उत्सर्गशास्त्रीयोद्देश्यतावच्छेदकव्याप्यधर्मावच्छिन्नोद्देश्यकत्वादपवादशास्त्रस्य शास्त्रेषु चोद्देश्यतावच्छेदकव्यापकप्रवृत्तिकत्वस्य न्याय्यत्वेनोद्देश्यतावच्छेदकावच्छेदेनोत्सर्गशास्त्रप्रवृत्तौ अपवादशास्त्रवैयर्थ्यापत्त्या उत्सर्गप्रवृत्तावप्रामाण्यबोधनपूर्वकं अपवादशास्त्रीयोद्देश्यतावच्छेदकव्यापकतावच्छेदकतां स्वीकृत्य ण्वुल्तृजादिवदपवादसंस्कार्येषु विकल्पापत्या उत्सर्गशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्नं आर्थिकनिषेधपरविशेषणदलोपस्थित्या अपवादशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्नातिरिक्तत्वेन सङ्कुच्य उत्सर्गशास्त्रं प्रवर्तनीयमित्यभिप्रायेणैव । एवं च विधिनिषेधयोरुभयोरार्थिकनिषेधपरशब्दनिवेशेन वाक्यार्थैकवाक्यता अवश्यमङ्गीकर्तव्या ; एतदेव ध्वनयितुं मूले अपिशब्दः प्र-

SGDF
Sri Gangeshwari Digital Foundation

युक्तः । अन्यथा पर्युदासपक्षापेक्षया प्रसज्यप्रतिषेधपक्षे वैलक्षण्यबोधनाय अपिशब्दानौचित्येन तुशब्द एव प्रयुक्तः स्यात् ॥

ननु ‘यत्तु— नानूयाजेष्वित्यादौ पर्युदास एव न प्रसज्यप्रतिषेधः; शास्त्रीयविहितप्रतिषिद्धत्वाद्विकल्पापत्तेः, वाक्यभेदापत्तेश्च । तथाहि— क्रियायाः कारकाकाङ्क्षत्वेन विनिगमनाविरहात् सकलकारकविशिष्टां भावनां प्रतियोगिभूतामुद्दिश्याभावस्य विधिस्तत्र वाच्यः, एवं चोद्देश्यस्य प्रतियोगिनः प्रसिद्ध्यर्थं प्राप्तिसापेक्षताप्रतिषेधस्य, प्राप्तिश्च क्वचिद्रागतः, यथा— ‘न कलञ्जं भक्षयेत्’ इति । तत्र हि रागेण कलञ्जभक्षणादेः इष्टसाधनत्वावगत्या प्रसक्तायाः कलञ्जभक्षणभावनायाः निषेधशास्त्रेण निवृत्तिविषयत्वेऽवगते अर्थात् तद्विषयकलञ्जभक्षणादेः अनिष्टसाधनत्वाक्षेपान्नित्यं ततो निवृत्तिः । प्रकृते च येयजामहशास्त्रत एव, साच प्रमारूपेत्युपजीव्येति च तस्या अत्यन्तबाधायोगाद्विकल्प एव प्राप्नोति, विकल्पे च प्रथमं व्रीह्यनुष्ठाने यवशास्त्रस्याप्रामाण्यस्वीकारात्मा प्रतीतप्रामाण्यपरित्यागो वेदे विपर्यासरूपा, प्रमितिजनकत्वासंभवात्, ततः प्रयोगान्तरे यवोपादाने यवशास्त्रस्य स्वीकृताप्रामाण्यपरित्यक्तप्रामाण्योपादानं, व्रीहिशास्त्रे च स्वीकृतप्रामाण्यपरित्यागरूपोऽप्रतीताप्रामाण्यस्वीकारः, पुनस्तृतीयप्रयोगे व्रीह्युपादाने व्रीहिशास्त्रस्य स्वीकृताप्रामाण्यपरित्यागात्मा त्यक्तप्रामाण्यस्वीकारः, इति चत्वारो दोषा यथाकथंचिद्भेदारोपेण अष्टौ वा दोषाः, इति तन्न; निषेधशास्त्रानालोचने सामान्यशास्त्रालोचनमात्रेण भ्रमात्मकप्रतियोगिप्रसिध्या अभावबोधसंभवेन विकल्पाप्राप्तेः । ननु निषेधशास्त्रस्यैव प्रथममालोचने विशेषदर्शनसत्वेन सामान्यशास्त्रतो भ्रमानुपपत्त्या तादृशप्रतियोगिनोऽप्रसिद्धौ तदुद्देश्यकप्रमानुपपत्तिरिति चेत्, न; निषेधशास्त्रस्य प्रथममालोचनं नाम तद्वाक्यज्ञानम्, उत तदर्थज्ञानम्; नाद्यः; तावन्मात्रेण विशेषदर्शनासंभवात्, नान्त्यः; प्रतियोग्यप्रसिध्या तदसंभवात् । किञ्च निषेधस्य प्रथममालोचने बाधबुद्धेः सत्वेन विधिवाक्यतः प्रमा दुरुपपादेति विकल्पापत्त्युक्त्यसंभवः, यद्वा तादृशे विषये आहार्यभ्रमात्मिका प्रतियोगिप्रसिद्धिरस्तु । एवमेव हि ‘नान्तरिक्षे जुहोति’ ‘ह्रदे वह्निर्नास्ति’ इत्यादौ प्रतियोगिप्रसिद्धिः सर्वैरुपपाद्या, प्रतियोगिज्ञानस्याभावधीहेतुत्वेऽपि त-

त्कारणतावच्छेदककोटौ अनाहार्यत्वनिवेशे मानाभावात् ससम्बन्धिपदार्थज्ञाने सम्बन्धितावच्छेदकप्रकारकज्ञानकारणतैव विशेषणतावच्छेदकप्रकारकज्ञानकारणतैव वा प्रतियोगिज्ञानकारणतेति पक्षेऽपि आहार्यानाहार्यसाधारणज्ञानत्वेनैव हेतुता । आहार्यतज्ज्ञानात् आहार्य एव स इति अनेनैव अतिप्रसङ्गभङ्गात् । आहार्यः शाब्दबोधो नेति तु अश्रद्धेयमेव । ह्रदवृत्तित्वाभावबोधो वह्नावित्यादि तु अधिकरणकारकस्य कर्तृकर्मद्वारा क्रियान्वयनियमादयुक्तम् । ‘प्रसक्तं निषिध्यते’ इत्यस्य प्रसञ्जनार्हमित्यर्थः । यदि निषेधो न स्यात्, स्यादेव सामान्येन प्रसक्तिरिति बोध्यम् । किं च विध्युपमर्दकत्वेनोपजीव्यादपि तस्मान्निषेधो बलवान् । एतदेवाभिप्रेत्य ‘निषेधाश्च बलीयांसः’ इति भाष्यकृतः । किञ्चोपजीव्यविरोधो विकल्पवादिनोऽपि । तथाहि— यागत्वावच्छेदेन येयजामहकर्मकभावनारूपवाक्यार्थो निषेधस्योपजीव्यः, तस्य च यत्रानूयाजे तदकरणं तदंशे विरोधः, अवच्छेदकावच्छेदेन प्रतीतेरप्रामाण्यं च । अनूयाजवाक्ये तु एकवाक्यतालोभेन पर्युदास इति तत्वम् । अत एव ‘द्वन्द्वे च’ ‘विभाषा जसि’ इत्यादीनां चारितार्थ्यम् । अत एव ‘सुडनपुंसकस्य’ इत्यादौ भाष्ये पर्युदासप्रसज्यप्रतिषेधयोः फलाविशेष उक्तः संगच्छते । एतदेव सकलमभिसन्धायोक्तं ‘न वेति—’ इति सूत्रे भाष्ये । न वेत्यखण्डनिपातार्थस्य निषेधस्य विभाषासंज्ञित्वे यद्यपि अप्राप्तविभाषाविषये निषेधकल्पितविधेरचारितार्थ्येन विकल्पः सिध्यति, तथापि प्राप्तविभाषायाः कृतसामर्थ्यो विधिरिति प्रतिषेध एव स्यान्न विकल्प इति ‘अपि तु वाक्यशेषत्वादितरपर्युदासः स्यात् प्रतिषेधे विकल्पः स्यात्’ इति जैमिनिसूत्रे प्रतिषेधे विकल्पः स्यादित्यभ्युच्चयः, युक्तिसिद्धपतञ्जलिवाक्यविरोधात्’ इति मञ्जूषाग्रन्थेन विधिनिषेधयोः विकल्पस्य न प्रसक्तिरिति बोधनात् वाक्यार्थैकवाक्यतास्वीकारो निष्फल एव इति चेत्, न; ‘तत्र प्रतिषेधे द्वयी गतिः, प्रतिषेधं दृष्ट्वा पश्चादुत्सर्गस्य तद्विषयत्वाभावज्ञाने प्रामाण्यग्रह इत्येका, एवमुत्सर्गापवादस्थलेऽपि उत्सर्गस्य अपवादनियमनिषेधानामेकवाक्यतेत्यपरा । तदुक्तम्—

“अनेकाख्यातयोगेऽपि वाक्यं न्याय्यापवादयोः ।
एकमेवेष्यते कैश्चिद्भिन्नरूपमवस्थितम् ॥

नियमः प्रतिषेधश्च विधिशेषस्तथा सति ।”

इति । न्याय्यः उत्सर्गः । आपाततो भिन्नवाक्यत्वावभासेऽपि सर्वस्याप्युत्सर्गस्य विशेषविधिनियमनिषेधविध्याकाङ्क्षानियमेन तल्लाभे वाक्यैकवाक्यता तयोः, तदलाभे तु स्वार्थ एव पर्यवसानम्’ इति तदग्रिममञ्जूषाग्रन्थेन विधिनिषेधयोः एकवाक्यतावश्यंभावबोधनात् । न चैवं वाक्यैकवाक्यतायामेव मञ्जूषाभिनिवेशः, न वाक्यार्थैकवाक्यतायामिति शङ्क्यम्, ‘एकवाक्यता चेत्थम्, यतो माठराय तक्रं अतस्तदतिरिक्तेभ्यो दधीत्येवेतीत्यलम्’ इति तदुत्तरग्रन्थेन वाक्यार्थैकवाक्यताया एव बोधनात् । अन्यथा ‘माठाराय न दधि’ इत्येव स्यादुक्तम् । एकवाक्यत्वस्यैवाभावे तु ‘दधि ब्राह्मणेभ्यः’ इत्यादौ माठरवर्जमेव दधिदानमुपक्रान्तं उत्तरकालं तक्रं माठरायेत्येतत्तस्य यथार्थत्वं गमयतीति भिन्नवाक्यतायामप्राप्त्यनुमानं बाधः स्पष्टमेवोक्तं पुञ्जराजेन । स्पष्टश्चायमर्थस्तत्रैव मञ्जूषायाम् । एवं च यत्र विधिनिषेधयोरेकवाक्यता तत्र पर्युदासन्यायेनाऽऽर्थो भेदबोधः । अत एवोक्तं मञ्जूषायां ‘घटभेदबोधस्त्वार्थः’ इति । न चैवं ग्रहणाग्रहणयोर्विकल्पासिद्धिर्दुर्वारेति शङ्क्यम्; ‘अतिरात्रे षोडशिनं गृह्णाति’ इति ग्रहणवाक्येन तस्य धर्मजनकता बोध्यते ‘नातिरात्रे षोडशिनं गृह्णाति’ इत्यनेन निषेधेन तस्याधर्मजनकतेति उभयत्रापि संकल्पलक्षणया संकल्पद्वयस्यापि धर्मत्वबोधनात् तयोरन्यतरस्य चेच्छया परिग्रहः । एवं सर्वत्र स्मार्तवैदिकविकल्पस्थले बोध्यम् । अत एव ‘वैकल्पिकेष्वादितोऽवधारणमित्युद्घोषः’ इति मञ्जूषयैव समाहितत्वात् । नापि ‘एतदेवाभिप्रेत्य’ ‘निषेधाश्च बलीयांसः’ ‘इति भाष्यकृतः’ इति पूर्वोक्तमञ्जूषाग्रन्थेन निषेधस्यैव बलीयस्त्वं बोध्यत इति वाच्यम्, अन्तरङ्गबहिरङ्गभावापन्नविधिनिषेधविषय एव तन्न्यायप्रवृत्तेः । अत्र च प्रमाणम्, ‘अर्थवदधातुरप्रत्ययः प्रातिपदिकम्’ इत्यत्रत्यमधातुग्रहणम् । तद्धि, अहन्, इत्यादौ नलोपाभावाय क्रियमाणं ‘अर्थवदप्रत्ययः प्रातिपदिकम्’ इति न्यासेनैव ‘अहन्’ इत्यादौ ‘निषेधाश्च बलीयांसः’ इत्यनेनैव न्यायेन प्रत्ययलक्षणेन तिङन्तत्वमादाय निषेधसिद्धौ तद्व्यर्थं सदन्तरङ्गबहिरङ्गभावापन्नविधिनिषेधविषय एव ‘निषेधाश्च बलीयांसः’ इति न्यायस्य प्रवृत्तिरिति बोधयत् ‘अहन्’ इत्यादौ तन्न्यायाविषयतया निषेधात्पूर्वमुपस्थितत्वाद्विधेरेव प्रवृत्तौ

[illegible] ಸಂಖ್ಯೆ.................. ....

प्रातिपदिकसंज्ञापत्त्या नलोपापत्तौ तद्वारणेन सार्थकं भवति। 'अथैवं अधातुपदं न हि भवति समर्थमेतदर्थज्ञापने, 'राजा' इत्यादौ नलोपसिद्धये 'न ङिसम्बुद्ध्योः' इति निषेधेन प्रत्ययलक्षणमाश्रित्य प्रत्ययान्तपर्युदासो नाश्रयणीयः इति ज्ञाप्यते, ततश्च, प्रत्ययान्तत्वप्रयुक्तस्य निषेधस्य 'अहन्' इत्यादौ नावकाशलेशोऽपीति तत्र निषेधाय चारितार्थ्यात्' इति चेत्, अत्रैवं प्रतिब्रूमः। 'हे सोमयाजिन्' 'हे पयस्विन्' इत्यादौ 'कृत्तद्धित—' इति सूत्रप्राप्तप्रातिपदिकसंज्ञानिमित्तकनलोपवारणेन सम्बुद्धिग्रहणं नालमुक्तमर्थं ज्ञापयितुम्, इति। यदि कृत्तद्धितसूत्रे अप्रत्ययपदमभिसंबध्य 'दाक्षी' 'दिदृक्षू' 'राजपुरुषौ' इत्यादौ एकादेशस्य पूर्वान्तवद्भावेन प्रातिपदिकत्वापत्तौ तद्व्यावृत्तये पूर्वसूत्रादप्रत्ययपदमवश्यमनुवर्तनीयमेवेति तद्बलात् कृत्तद्धितभिन्नप्रत्ययान्तभिन्नस्यैव कृत्तद्धितान्तस्य उत्तरसूत्रेण प्रातिपदिकसंज्ञाविधानमिति 'हे सोमयाजिन्' 'हे पयस्विन्' इत्यादौ नापादनीया भवति उत्तरसूत्रेण प्रातिपदिकसंज्ञा, अतश्च, तस्यानर्थक्यं स्पष्टमेवेति ज्ञापनसामर्थ्यं तदीयमपह्नोतुं कोहि नाम प्रभवति, इति प्रत्यवतिष्ठते, तत्रैवं समाधास्यामः। अप्रत्ययपदानुवृत्तावपि 'भक्षितेऽपि लशुन—' इति न्यायेन न दोषो 'दाक्षी' इत्यादौ सुपरिहरो भवति, यतः पूर्वान्तवद्भावेन परादिवद्भावेन च कृत्तद्धितभिन्नत्वं भवति दुरुपपादं। किञ्च कृत्तद्धितान्तप्रकृतिकप्रत्ययान्तभिन्नस्यैव प्रातिपदिकसंज्ञाविधानेऽपि उत्तरसूत्रेण प्रतिप्रसवविधिना कृत्तद्धितातिरिक्तप्रत्ययान्तस्यैवाप्रत्ययः इति निषेधो बोध्यते। 'राजपुरुषौ' इत्यादौ तु समासग्रहणस्य नियमार्थत्वाश्रयणेन यस्य पूर्वसूत्रेण प्रातिपदिकसंज्ञा प्राप्तिः तत्रैव नियमप्रवृत्तिरित्याश्रयणात्प्रातिपदिकसंज्ञाया अप्रवृत्तिः। अत एव 'पञ्चगवधनः' इत्यादौ पञ्चगवेत्यस्य न समासत्वेन प्रातिपदिकत्वम्, प्रत्ययान्तत्वात्। अन्यथा समासत्वेन प्रातिपदिकत्वापत्तिर्दुर्वारा। तद्धितान्तत्वेन प्रातिपदिकत्वं पुनः अर्थवत्त्वाभावाद्वारणीयम्, तथा च 'हे सोमयाजिन्' इत्यादौ नलोपाभावसम्पादनाय सम्बुद्धिग्रहणस्यावश्यकत्वमेवेति न तत् ज्ञापकताकोटिमाटीकताम्। न चैवं 'राजा' इत्यादौ प्रत्ययलक्षणेन प्रत्ययान्तत्वान्निषेधापत्तौ नलोपो न स्यादिति शङ्क्यम्। 'न लोपः प्रातिपदिकान्तस्य' इत्यत्र 'न लोपोऽङ्गस्यातिङः' इति न्यासेन तत्सिद्धेः। न हि तथा

S. Kuppuswami Sastrigal, M. A., Ag. Professor of Sanskrit & Comparative Philology, Presidency College, Madras.— I have persed some portions of the work called *Nagesasaya Nirnaya* by Brahma-Sri R. Narayanasastrial of the Tiruvadi Sanskrit College. This work is a earned commentary on the famous treatise called Paribhashendusekhara by Nagesa Bhatta. The author proposes to critically examine in this commentary the various interpretations given by other commentators on Paribhashendusekhara. I see that this commentary has already met with the approbation of some eminent Vyakaranas like Mahamahopadhyaya Subbarayachariar. From the portions I have seen, I can confidently say that Mr. Sastriar's commentary, when published, will hold a prominent place in the dialectic literature relating to the Vyakarana Sastra. Mr. Sastriar's work in this direction deserves encouragement.

NEW PUBLICATIONS.

Sastra Darpana by Sri Amalananda, the author of Kalpataru. This is a masterly treatise on the Brahmasutras consisting of splendid lectures on each Adhikarana. Crown 8vo. pp. 369. Cloth Gilt. **Rs. 2-8-0.**

Taittiriyopanishad Bhashya with the commentary called **Vanamala** by Sri Achyuta Krishnananda Tirtha. This precious commentary is quite invaluable to a right understanding of the Bhashya of Sri Sankara. Royal 8vo. pp. 270. Price **Rs. 3.**

Bhagavad Gita with the commentary called **Brahmanandagiri** by Sri Venkatanatha. An excellent Advaitic Commentary far superior in every respect to all others published hitherto. The author seems to have been very learned with his critical faculties fully developed. Crown 8vo. pp. 614. Price **Rs. 3.**

THE MANAGER,
Bookselling Department,
SRI VANI VILAS PRESS,
SRIRANGAM, (Madras Presidency, S. India.)

SGDF
Sri Gurgeshwari Digital Foundation

OPINIONS.

The Honorable Mr. V. Krishnaswamy Iyer. C. S. I.—Brahma Sree R. Narayana Sastrial is a pundit of rare ability. He has a profound knowledge of Vyakarana. His powers of versification are high and his compositions are singularly free from the defects of modern pundits. His character is very good. In my opinion he deserves the patronage of all lovers of Sanskrit.

तिरुविशनल्लूर् महामहोपाध्याय श्रीरामसुब्रह्मण्यशास्त्रिणः—

भाष्ये पातञ्जले यन्मतिरतिवितता शेखरे ग्रन्थवर्ये
काव्यालङ्कारवर्गे बहुविधरचना यस्य सम्यक् प्रसिद्धा ।
द्राक्षापाको यदीये वचसि सुमधुरो नन्दनीयः कवीन्द्रः
सोऽयं नारायणाख्यो मम मुदमतनोद्रामसुब्बोर्वचोभिः ॥

नागेशाशयनिर्णयसमाह्वयस्तेन निर्मितो ग्रन्थः ।
दृष्टोऽयमेक एव प्रभवति नागेशहृदयनिर्णीतौ ॥

पञ्चनदक्षेत्रवास्तव्यवैयाकरणवर्य महामहोपाध्याय श्रीमुष्णसुब्बरायाचार्याः— चोलमण्डलमण्डलायमानराधामङ्गलग्रामाभिजनेन सरसकविताचतुरेण वैयाकरणश्रेष्ठेन नारायणशास्त्रिणा प्रणीतं नागेशाशयनिर्णयाभिधानं परिभाषेन्दुशेखरव्याख्यानमवलोक्य एवं मन्येऽहम् । यद्यपि पण्डितवर्यैः प्रणीतानि परिभाषेन्दुशेखरव्याख्यानानि सन्ति, तथापि अत्र उल्लिखिता अनेके नवीना विषयाः तेषु नोपलभ्यन्ते । किं च प्रायो व्याख्यानानि मूलखण्डनपराण्येव दृश्यन्ते । इदं तु तत्खण्डनस्य अलम्भकतां प्रदर्श्य मूलाशयवर्णनेन मूलार्थस्य दार्ढ्यं स्फोरयति । एवमादयो बहवो गुणा उपलभ्यन्ते । तस्मादवश्यमुपादेयमिति ॥

पुदुक्कोट्टै राजस्थानदानाधिकारिणः पुदग्रहारं श्रीगोपालशास्त्रिणः—

नागेशाशयनिर्णयभूषितभूषणविराजितो जयति ।
खण्डितदोषकलापो भुवि परिभाषेन्दुशेखरो नाम ॥

मन्निकटाच्चिरकालं गृहीतविद्यः कवीश्वरः प्रथते ।
नागेशाशयनिर्णयविधिना नारायणाभिधः शास्त्री ॥

मत्कृतभूषणविवरणनागेशाशयविनिर्णयं वीक्ष्य ।
नानाखण्डनविकृतीर्जाता वेलेति निन्दितुं मन्ये ॥

नवसालपुराधीशश्रीमन्मार्ताण्डभूपतेः ।
दानाधिकारी गोपालशास्त्रीत्थं बहुमन्यत ॥

SGDF
Sri Gangeshwari Digital Foundation